अथ गौर्यादिमातृणां स्थापनं ॥ हस्ते अक्षतान् गृहीत्वा ॥ कोष्ठात् बहिः वायव्यां गणपतिं॥देवं नमामि गिरिजात्मजमेकदंतं सिंदूरचर्चितवपुः सुविशालशुंडं ॥ नागेंद्रमण्डिततनुर्युतसिद्धिबुद्धिसेव्यं सदा सुरगणैः सकलार्थसिद्ध्यै ॥ गणेश इहागच्छ इह तिष्ठ गणेशायनमः गणेशमावाहयामि स्थापयामि ॥ गौरीं ॥ एह्येहि नीलोत्पल तुल्यनेत्रे श्वेताम्बरे भोज्वलशूलहस्ते ॥ नागेन्द्रकन्ये भुवनेश्वरि त्वं पूजां ग्रहीतुं मम देवि गौरि ॥ गौरि इहागच्छ इह तिष्ठ गौर्यै॰ गौरिमावाहयामि स्था॰ ॥ १ ॥ पद्मां ॥ एह्येहि पद्मे शशितुल्यवक्त्रे पङ्केरुहाभे भूमौ काष्ठमयपीठे रक्तवस्त्रं प्रसार्य तदुपरि पंचदशाक्षतपुञ्जान् कुर्यात् ॥ तेषु पूगीफलानि निधाय ॥ तदुपरि गणेशेनाधिकाश्चतुर्दश मातृकाः स्थापनीयाः ॥ तत्रापि क्रमः ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता॥गणेशेनाधिकाह्येता वृद्धौ पूज्याश्चतुर्दश ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ॥ केचित् ॥ श्रीलक्ष्मी धृति मेधा स्वाहा प्रज्ञा सरस्वती ॥ घृतेन मातरः सप्त पूज्याश्च विधिवत् क्रमात् ॥ एताः घृतमातृकाः नांगीकृताः शूद्रकमलाकरादिभिः ॥ कर्मादिषु तु सर्वेषु मातरः स गणाधिपाः ॥ पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः॥ मातृशब्देन सगणेशगौर्यादि च मनुष्यमातरो ग्राह्याः ॥ इति शूद्रकमलाकरे ॥ अत्र चतुर्दश मातृपदसमाहारान् मातरो लोकमातर इति सर्वासाम् विशेषणम् ॥ इति हेमाद्रौ कर्मकल्पद्रुमोक्तेश्च यत्र वृद्धिश्राद्ध तत्र मातृपूजा यत्र श्राद्धाभावस्तत्र मातृपूजनाभावः इति शातातपः ॥

अर्थ—गौर्यादि मातृकानुं स्थापन बाजठ अथवा पाटला वीगेरे मूकी तेनापर लाल ककडो पाथरी ॥१५॥ ढगली काचा भातनी करी तेनापर सोपारी मोठववां.

शुभचक्रहस्ते ॥ सुरासुरेन्द्रैरभिवंदिते त्वं पूजा ग्रहीतुं मम यज्ञभूमौ ॥ पद्मे इहागच्छ इह तिष्ठ पद्मायै० पद्मा-
मावाहयामि स्था० ॥ २ ॥ शची ॥ एह्येहि कार्तस्वर तुल्यवर्णे गजाभिरूढे जलजाभिनेत्रे ॥ शक्रप्रिये प्रोज्व-
लवज्रहस्ते पूजां ग्रहीतुं शचि देवि शीघ्रं ॥ शचि इहागच्छ इह तिष्ठ शच्यै नमः शचीमावाहयामि स्था० ॥३॥
अकृत्वा मातृपूजान्तु यः श्राद्धं परिवेषयेत् ॥ तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः ॥ आदौ विनायकः पूज्यो अंते च कुलदेवतेति ।
शिष्टवाक्यात् ॥ आदौ विनायकपूजनं ॥ कुड्यलग्नां वसोर्द्धारां सप्तधारां घृतेन तु ॥ कारयेत् पंच धारां वा नातिनीचां न चोच्छ्रितां ॥ कुड्यल-
ग्नां मातृसमीपभित्तिलग्नां घृतेन पुत्रशिष्यादिना सप्त पंच वा धारां कारयेत् सप्त ॥ पंच भवत्यत्र ऐच्छिको विकल्पः ॥ वसुराभिर्वसुद्रूप्यं
वसवोऽष्टाविति कोशदर्शनात् च शतपथश्रुतेः ॥ वसोरग्नेरेव ॥ च परं कौशीतकीब्राह्मणवाक्यात् अग्निः सर्वदेवात्मकः ॥ अग्निर्वै वसवो देवता
इति श्रुतेः ॥ तस्मात् अग्निमंत्रेण वसोर्द्धारा कर्तव्या ताः प्रादक्षिण्येन कुर्यात् दैवत्वात् नोच्छ्रितां नात्युच्चां नोचरस्तथेति कुड्ये कृतधारायां
वसुधारायै नमः इत्यानाद्य नाममंत्रैः प्रणवादिनमोन्तैः ॥ प्रतीचिमारभ्य प्राग् पर्यंताः वा दक्षिणस्यामारभ्य उदीचि पर्यंताः प्रत्येकं काण्डानु-
समयेन वा पदार्थानुसमयेन पूजयेत् ॥ ॥

वायव्य कोणे गणपतिनुं स्थापन करी नैर्ऋत्य खूणे गौरि तेनाउपर पद्मा ए प्रमाणे पश्चिमथी पूर्व तथा दक्षिणथी उत्तर स्थापन करवु. गौर्यादिनुं स्थापन थयापछी
तेनी जमणी तरफ सात टपकां भातनी ढीगी करी तेनापर ब्राह्म्यादिमातृकानुं स्थापन करवु

मेधां॥एह्येहि मेधे शुभभूमिसंस्थे पीताम्बरे पुस्तकपात्रहस्ते ॥ बुद्धिप्रदे हंससमाधिरूढे पूजां ग्रहीतुं मखमस्मदीयं ॥ मेधे इहागच्छ इह तिष्ठ ॥ मेधायै नमः ॥ मेधामावाहयामि स्थापयामि ॥ ४ ॥ सावित्रीं ॥ एह्येहि सावित्रि जगद्विधात्रि ब्रह्मप्रिये स्रुक्स्रुवपात्रहस्ते ॥ प्रतप्तजांबुनदतुल्यवर्णे पूजां ग्रहीतुं निजयज्ञभूमौ ॥ सावित्रि इहागच्छ इह तिष्ठ ॥ सावित्र्यै नमः॥सावित्रीमावाहयामि स्थापयामि ॥५॥विजयां॥एह्येहि शास्त्रास्त्रधरे कुमारि सुरासुराणां विजयप्रदात्रि ॥ त्रैलोक्यवन्द्ये शुभरत्नभूषे गृहाण पूजां विजये नमस्ते ॥ विजये इहागच्छ इह तिष्ठ ॥ विजयायै नमः ॥ विजयामावाहयामि स्थापयामि ॥६॥ जयां ॥ एह्येहि पद्मोरुहलोलनेत्रे जयप्रदे प्रोज्वलशक्तिहस्ते ॥ ब्रह्मादिदेवैरभिवंद्यमाने जयैव सिद्धिं कुरु सर्वदा मे ॥ जये इहागच्छ इह तिष्ठ ॥ जयायै नमः ॥ जयामावाहयामि स्थापयामि ॥७॥देवसेनां ॥ एह्येहि चापासिधरे कुमारि मयूरवाहि कमलायताक्षि ॥ इंद्रादि देवैरपिस्तूयमाने प्रयच्छति त्वं मम देवसेने ॥ देवसेने इहागच्छ इह तिष्ठ ॥ देवसेनायै नमः ॥ देवसेनामावाहयामि स्थापयामि ॥ ८ ॥ स्वधां ॥ एह्येहि वैश्वानरवल्लभे त्व कव्यं पितृभ्यः सततं वहन्ति ॥ स्वर्गाधिवासे शुभशक्तिहस्ते स्वधे तु नः पाहि मखं नमस्ते ॥ स्वधे इहागच्छ इह तिष्ठ ॥ स्वधायै नमः ॥ स्वधामावाहयामि स्थापयामि ॥९॥

स्वाहां ॥ एह्येहि वैश्वानरतुल्यदेहे तडित्प्रभे शक्तिधरे कुमारि ॥ हविर्गृहीत्वा सुरतृप्तिहेतोः स्वाहे च शीघ्रं मख-मस्मदीयं ॥ स्वाहे इहागच्छ इह तिष्ठ ॥ स्वाहायै नमः ॥ स्वाहामावाहयामि स्थापयामि ॥ १० ॥ हृष्टिं ॥ एह्येहि भक्ताभयदे कुमारि समस्तलोकप्रियहेतुमूर्ते ॥ प्रोत्फुल्लपंके रुहलोलनेत्रे हृष्टे मखं पाहि शिवस्वरूपे॥ हृष्टे इहागच्छ इह तिष्ठ हृष्टये नमः ॥ हृष्टिमावाहयामि स्थापयामि॥ ११ पुष्टिं॥एह्येहि पुष्टे शुभरत्नभूषे रक्तांबरे रक्तविशालनेत्रे ॥ भक्तप्रिये पुष्टिकरि त्रिलोके गृहाण पूजां शुभदे नमस्ते ॥ पुष्टे इहागच्छ इह तिष्ठ ॥ पुष्टयै नमः ॥ पुष्टिमावाहयामि स्थापयामि॥१२॥तुष्टिं एह्येहि तुष्टेऽखिललोकवंद्ये त्रैलोक्यसंतोषविधानदक्षे॥पीतांबरे शक्तिगदाब्जहस्ते वरप्रदे पाहि मखं नमस्ते॥ तुष्टे॥ इहागच्छ इह तिष्ठ॥तुष्टयै नमः॥तुष्टिं मावाहयामि स्थापयामि॥१३॥कुलदेवताम्॥ एह्येहि दुर्गे दुरितौघनाशिनि प्रचंडदैत्यौघविनाशकारिणि ॥ शिवे महेशार्धशरीरधारीणि स्थिरा भव त्वं मम यज्ञकर्मणि॥ आत्मनः कुलदेवतायै नमः॥आत्मनः कुलदेवतामावाहयामि स्थापयामि॥ इति गौर्यादि मातृकास्थापनम्॥ अथ ब्रह्म्यादि मातृकास्थापनाम् ॥ १ ॥ ब्राह्मीं ॥ चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदां ॥ सृष्टिरूपां महाभागां

हवे गणपति सह गौर्यादि १४ मातृकानुं स्थापन थया पछी तेनुं पूजन वक्ष्य प्रमाणे करवुं, अथवा एनी साथे ब्राह्म्यादि अष्टमातृकानुं स्थापन करी एक तंत्रे प्रतिष्ठा करी पूजन करवुं, ए यथावकाश समजवुं; पूजन प्रकार शास्त्रार्थमां आपेलो छे.

ब्रह्माणीं तां नमाम्यहं ॥ ब्राह्मि इहागच्छ इह तिष्ठ ॥ ब्राह्मयै नमः ॥ ब्राह्मीमावाहयामि स्थापयामि ॥१॥ माहेश्वरीं ॥ माहेश्वरीं नमाम्यद्य सृष्टिसंहारकारिणीं ॥ वृषारूढां शुभां शुभ्रां त्रिनेत्रां वरदां शिवां ॥ माहेश्वरि इहागच्छ इह तिष्ठ ॥ माहेश्वर्यै नमः ॥ माहेश्वरीमावाहयामि स्थापयामि ॥ २ ॥ कौमारीं ॥ एह्येहि कौमारि विधेहि शांतिं शक्तिं दधानेऽपि सदाभ्रमध्ये ॥ स्कंधाधिरूढे शिखिपुंगवाभ्यां मातः प्रसीद प्रसृतिं प्रयच्छ॥ कौमारि इहागच्छ इह तिष्ठ ॥ कौमार्यै नमः ॥ कौमारीमावाहयामि स्थापयामि ॥ ३ ॥ वैष्णवीं ॥ शंखचक्रगदापद्मधारिणीं कृष्णरूपिणीं ॥ स्थितिरूपां खगेन्द्रस्थां वैष्णवीं तां नमाम्यहम् ॥ वैष्णवि इहागच्छ इह तिष्ठ ॥ वैष्णव्यैनमः वैष्णवीमावाहयामि स्थापयामि ॥ ४ ॥ वाराहीं ॥ वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ॥ शुभदां पीतवसनां वाराहीं तां नमाम्यहं ॥ वाराहि इहागच्छ इह तिष्ठ ॥ वाराह्यै नमः ॥ वाराहीमावाहयामि स्थापयामि ॥ ५ ॥ इंद्राणीं ॥ इंद्राणीगजकुंभस्थां सहस्रनयनोज्ज्वलाम् ॥ नमामि वरदां देवीं सर्वदेवैर्नमस्कृताम् ॥ इन्द्राणि इहागच्छ इह तिष्ठ ॥ इन्द्राण्यै नमः ॥ इन्द्राणीमावाहयामि स्थापयामि ॥ ६ ॥ चामुंडां ॥ चामुंडां मुंडमथनां मुंडमालोपशोभितां ॥ अट्टाट्टहासमुदितां नमाम्यात्मविभूतये ॥ चामुण्डे इहागच्छ इह तिष्ठ ॥ चामुण्डायै नमः ॥ चामुण्डामावाहयामि

स्थापयामि ॥ इत्यावाह्य॥ वसुधारायै नमः इत्यनेन घृतेन पंच सप्त वा धारां कुर्यात् ॥ गुडद्रव्यं तदुपरि स्थापयेत तदुपरि रौप्यमुद्रामपि स्थापयेत् ॥ प्रतिष्ठां कुर्यात् ॥ प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता ॥ प्रतिष्ठां तां करोम्यत्र मंडले दैवतैः सह ॥ सगणेशगौर्याद्यावाहितमातरः ब्राह्म्यादि सप्तमातरश्च सुप्रतिष्ठिताः वरदाः भवत ॥ सगणेशगौर्याद्यावाहितमातृभ्यो नमः ॥ आवाहनं स० ॥ सगणेशगौर्याद्या० आसनं स० ॥ सगणेशगौर्याद्या० पाद्यं स०॥ सगणेशगौर्याद्या० अर्घ्यं स० ॥ सगणेशगौर्याद्या० आचमनीयं स० ॥ सगणेशगौर्याद्या० स्नानं स० ॥ सगणेशगौर्याद्या० वस्त्रं स० ॥ सगणेशगौर्याद्या० उपवीतं ०॥ सगणेशगौर्याद्या० गंधं स० ॥ सगणेशगौर्याद्या० पुष्पं स०॥ सगणेशगौर्या० अलंकारार्थं कुंकुमाक्षतान् स०॥ सगणेशगौर्याद्या० सुशोभनार्थं सौभाग्यद्रव्यं०स०॥सगणेशगौर्याद्या० धूपं स० सगणेशगौर्याद्या० दीपंस०॥सगणेशगौर्याद्या० नैवेद्यं स०॥ सगणेशगौर्याद्या० तांबूलं स० ॥ सगणेशगौर्याद्या० साद्गुण्यार्थं दक्षिणांस० ॥ सगणेशगौर्याद्या० प्रदक्षिणां स० ॥ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथा सुरवधादधुनैव सद्यः ॥ पापानि सर्व जगतां प्रशमं नयाशु उत्पातपातजनितांश्च

अर्थ—गौर्यादि षोडश मातृकानुं स्थापन करीने तेनी प्रतिष्ठा करी आवाहन आसन वगेरेथी पुष्पांजलि लगी पूजा करी प्रार्थना करी करेली पूजा अर्पण करवी आकल्यादिनुं स्थापन थया पछी सात धारा कर्यां होय तेना उपर घीनी मंत्रथी धारा करवी गोळ तथा रूपानाणुं मोकलुं.

महोपसर्गान् ॥ सगणेशगौर्याद्या० पुष्पांजलिं स० ॥ अनेन पूजनेन सगणेशगौर्याद्यावाहितमातरः श्रीयंताम् ॥ हस्ते जलमादाय ॥ अद्येत्यादि० अस्मिन् कर्मणि आयुष्याभिवृद्ध्यर्थं ब्राह्मणद्वारा आयुःशांतिजपं करिष्ये इति संकल्प्य ॥ विप्राः पठेयुः॥ ते च ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ १ ॥ एतत् कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥ रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वांबिके तत् प्रकरोति कान्या ॥ २ ॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्वगर्तेऽतिमहांधकारे विभ्रामयत्येतदतीव विश्वं ॥ ३ ॥ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥ ४ ॥ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्॥विश्वेशवंद्या भवती भवन्ती विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ५ ॥ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथा सुरवधादधुनैव सद्यः ॥ पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥६ ॥ हस्ते जलमादाय॥अद्येत्यादि० कृतेन आयुःशांतिजपाख्येन भगवान् कर्माधीशः

अर्थ–हाथमां जळ लइ आयुष्यवृद्धिमाटे संकल्प करी ब्राह्मण पासे आयुष्य मंत्रपाठ कराववो ते पाठकोने दक्षिणा आपी नमस्कार करवा ए प्रमाणे मातृकास्थापन करी नांदीश्राद्धनो आरंभ करवो.

प्रीयताम् ॥ तेन करिष्यमाणकर्मणि आयुष्याभिवृद्धिरस्तु ॥ आयुष्यमंत्रपाठकेभ्यो यथाशक्ति दक्षिणां दद्यात् ॥ इति मातृकास्थापनप्रयोगः ॥ **अथ नांदीश्राद्धं** ॥ तत्र प्रथमं वैश्वदेवः तदभावे अद्येत्यादि० अस्मिन् कर्मणि विहितवैश्वदेवाकरणजनितप्रत्यवायपरिहारार्थं करणजनितफलप्राप्त्यर्थं इदं तंडुलपात्रं सदक्षिणाकं शास्त्रोक्तपुण्यफलप्राप्त्यर्थं गोत्राय ब्राह्मणाय संप्रदास्ये ॥ तेन करिष्यमाणकर्मणि अविकारसिद्धिरस्तु ॥ नांदीश्राद्धं सपिण्डकं अपि-

१ वृद्धिश्राद्धं पुरा कार्यं कर्मादौ स्वस्तिवाचनमिति ॥ त्रिकाण्डिस्मरणात् नवग्रहयज्ञादौ नांदीश्राद्धमिति वाच्यम् ॥ कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनि ॥ नामकर्मणि बालानां चूडाकर्मादिके तथा ॥ सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ॥ नांदीमुखान् पितॄनादौ तर्पयेत् प्रयतो गृहीति शान्तिसारे ॥ तत्र नांदीमुखाः पितरः पितामहाः प्रपितामहाः सपत्निकाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीका इति षड्भ्यः पितृभ्यः पार्वणवत् स्यात् ॥ कुशस्थानेषु दूर्वाः स्युः मंगलस्याभिवृद्धये ॥ इति आश्वलायनोक्तेः ॥ तत्र साकल्पिके समंत्रकावाहनार्घ्याग्नौकरणपिण्डदानविकिरास्वधावाचनप्रश्नेत्येवत् सप्तक वर्ज्यं ॥

१ हवे नांदीश्राद्ध करवु तेमा पहेला वैश्वदेव करवो तेने बदले चोखा तथा घी ब्राह्मणने आपी संकल्प करी कर्म करवु वृद्धिश्राद्धमां कर्तानो बाप तथा तेनो बाप तथा मा तथा तेनो बाप जीवतो होय तो करवानी जरुर नथी. वृद्धिश्राद्ध संकल्पमां करवु, ते बे प्रकारनु छे पिंडवालु ने पिंड वगरनु तेमां पिंडवालु करवु होय तो बधु श्राद्ध प्रमाणे करी पिंड मूकवा अने साकल्पीक श्राद्ध होय तो पिंड मूकवानी जरुर नथी केटलेक ठेकाणे ब्राह्मणो संकल्प श्राद्ध करावतु कही पिंड मूकावे छे जेथी बेउनुं फळ मळतु नथी संकल्प श्राद्धमां बाबना तरभाणामां जव दरभी भाजनी करी सोपारी गोठवी जमणा हाथमां पाणी लइ तेना उपर एटले वृद्धिश्राद्धमां सत्य अने वसु नामना विश्वेदेवा छे तेना उपर पाणी रेडवु पछी बीजा देवतापर तथा त्रीजा उपर एम अनुक्रमे पूजा करवी॥

एकं वा फलं समानं ॥ तत्र सांकल्पेन विधिना अपिण्डकप्रयोगः ॥ ताम्रपात्रे त्रीणि वट्टानि वा अक्षतपुंजानि कृत्वा ॥ तस्योपरि पूगीफलानि निधाय ॥ दक्षिणहस्ते सजलदूर्वाङ्कुरान् गृहीत्वा ॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ अद्य पूर्वोच्चरितशुभपुण्यतिथौ मम सुतस्य वा सुतायाः विवाहांगत्वेन सांकल्पेन विधिना नांदीश्राद्धं करिष्ये ॥ आसनदानं ॥ सत्यवसुसं-

अनाम्ना अतिलैश्चैव नांदीश्राद्धं च सव्यतः ॥ इति संग्रहे व्रतयज्ञविवाहेषु श्राद्धहोमार्चने जपे ॥ आरब्धे सूतकं न स्यात् अनारब्धे तु सूतकं ॥ इति विष्णुपुराणे ॥ आरंभो वरणं यज्ञे सकंल्पव्रतसत्रयोः नांदीश्राद्ध विवाहादौ श्राद्धे पाकपरिक्रियेति ब्रह्मपुराणे ॥ विश्वेदेवाः कार्यपरत्वे ॥ इष्टिश्राद्धे क्रतुर्दक्षः संकीर्त्यौ वैश्वदेविके ॥ नांदीमुखे सत्यवसू काम्ये च धूरिलोचनौ ॥ पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ ॥ नैमित्तिके कामकालावेव सर्वत्र कीर्तयेत् ॥ इतिश्राद्धमयूखे ॥

संकल्प विधिथी नांदीश्राद्ध करवु तेमां आवाहन, अर्घ, अग्नौकरण, पिंडदान, विकिर, अक्षय्य, स्वधा, वाचन प्रश्न, ब्राह्मणोनो त्याग करवो कह्योछे, तेमज— नाम तथा तिल तथा अपसव्यथी पण करवु नहीं. १ यज्ञमां, वरण व्रत अने सत्र तेमां संकल्प— विवाहमां— नांदीश्राद्ध— अने श्राद्धमां रसोइ— वगेरे

ज्ञकानां विश्वेषां देवानां नांदीमुखाना इदमासनं सुखासनं नांदीश्राद्धे क्षणौ क्रीयेतां तथा प्राप्नुताम् भवन्तौ प्राप्नवाव ॥ गोत्राणां पितृपितामहप्रपितामहानां सपत्नीकानां नांदीमुखानां इदमासनं सुखासनं नांदीश्राद्धे क्षणाः क्रीयंताम् तथा प्राप्नुवन्तु भवंतः प्राप्नवाम ॥ द्वितीयगोत्राणां मातामह प्रमातामह वृद्धप्रमातामहानां सपत्नीकानां नांदीमुखानां इदमासनं सुखासनं नांदीश्राद्धे क्षणाः क्रीयंतां तथा प्राप्नुवन्तु भवंतः प्राप्नुवाम ॥ गंधादिदानं ॥ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्य इदं गंधाद्यर्चनं नमः संपद्यंतां वृद्धिः ॥ गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्योः यथादत्तं गंधाद्यर्चनं नमः संपद्यंतां वृद्धिः ॥ द्वितीयगोत्रेभ्यो मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः नांदीमुखेभ्यः यथादत्तं गंधाद्यर्चनं नमः संपद्यंतां वृद्धिः ॥ भोजननिष्क्रयद्रव्यदानं ॥ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं अमृतरूपेण नमः संपद्यंतां वृद्धिः ॥ गोत्रेभ्यः

नांदीश्राद्धे अन्नाभावे आमं आमाभावे हिरण्यं हिरण्याभवे युग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतयथाशक्तिकिंचिद्द्रव्यदानं ॥ इति धर्मसिंधौ॥

करवाथी सुतकादिनो बाध लागतो नथी. पछी आसननो संकल्प करी स्थापित देवोपर पाणी मुकवुं तथा तेनापर चंदन फुल चडाववा तथा ब्राह्मणभोजन विगेरेनो संकल्प करवो.

पितृपितामह प्रपितामहेभ्योः सपत्नीकेभ्यो नांदीमुखेभ्योःयुग्मब्राह्मणभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं अमृतरूपेण नमः सपद्यंतां वृद्धिः ॥ द्वितीयगोत्रेभ्यो मातामह प्रमातामह वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं अमृतरूपेण नमः संपद्यंतां वृद्धिः ॥ सक्षीरमुदकदानं ॥ नांदीमुखाः सत्यवसुसंज्ञका विश्वेदेवाः प्रीयंतां ॥ गोत्राः पितृपितामह प्रपितामहाः सपत्नीकाः नांदीमुखाः प्रीयंतां ॥ द्वितीयगोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः प्रीयंतां ॥आशिषोग्रहणं ॥ गोत्रं नो वर्द्धतां ॥ वर्द्धतां वो गोत्रं॥दातारो नोऽभिवर्द्धतां अभिवर्द्धतां वो दातारः॥ संततिर्नोऽभिवर्द्धत अभिवर्द्धतां वः संततिः॥ श्रद्धा च नो माव्यगमत ॥ माव्यगमद् वः श्रद्धाः ॥ बहुदेयं च नोऽस्तु ॥ अस्तु वो बहुदेयं ॥ अन्नं च नो बहु भवेत् ॥ भवतु वो बह्वन्नं ॥ अतिथिंश्च लभामहे ॥ लभंतां वो

• • प्रीयंतामित्यत्र यवक्षीरजलानि दद्यात् ॥ इति प्रयोगरत्नगदाधरौ॥प्रीत्यै सक्षीरदानं ॥ आभ्युदयिकश्राद्धं तु आचारात् ॥

दूधमां पाणी रेडीने नांदीमुख देवोने आपवाथी ते प्रसन्न थई कुटुंबविगेरेमा थतो क्लेश नाश करी प्रीती उत्पन्न करावेछे एवुं ग्रंथकारनु केहेवुंछे ॥ पात्रमां जल लइ तेमां दुध रेडी ते देवताओने अर्पण करवाथी वंशवृद्धि थायछे. ब्राह्मणोने नांदिश्राद्ध थयुं ए प्रश्नो विगेरे पुछवा. दरेक देवना उद्देशथी रुपियो पा आपवानो संप्रदाय छे—नांदीश्राद्धमां जे न्यूनाधिक थयुं होय तेनी परिपुर्ती करी संकल्प करी देवताने अरपण करवुं, ए प्रमाणे नांदीश्राद्ध

अतिथयः ॥ याचितारश्च नः संतु ॥ संतु वो याचितारः॥ एता आशिषः सत्याः संतु ॥ संत्वेताः सत्या आशिषः॥ दक्षिणादानं ॥ सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्यःकृतस्य नांदीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे ॥ गोत्रेभ्यः पितृपितामह प्रपितामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यः कृतस्य नांदीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे॥द्वितीय गोत्रेभ्यो मातामह प्रमातामह वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः नांदीमुखेभ्यः कृतस्य नांदीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे ॥ ततो नांदीश्राद्धं संपन्नं ॥ सुसंपन्नं ॥ जलं गृहीत्वा ॥ अनेन नांदीश्राद्धकर्मणा कृतेन श्रीनांदीमुखदेवताः प्रीयंतां ॥ अस्मिन्नांदीश्राद्धे न्यूनातिरिक्तो यो विधिः ॥ स उपविष्टब्राह्मणानां वचनात् नांदीमुखप्रसादात् सर्वं परिपूर्णं ॥ अस्तु परिपूर्णम् ॥

॥ अथ अर्घ्यंदनं ॥

पाद्यार्घ्यपात्राणां स्थापनं ॥ तत्र ॥ कांस्यसंपुटे ताम्रसंपुटे वा ॥ शरावे ॥ आपः क्षीरं

२ आचारात् अर्घ्यंदनम्॥ब्राह्मणस्मरणार्थं पाद्यार्घ्यंदनमिति केचित् ॥ कुष्ठं मासी हरिद्रे द्वे सुराशैलेपचंदनं ॥ त्वचा चंपकमुस्ता च सर्वौषध्यो दश स्मृताः ॥ इति भविष्यपुराणे ॥

थयुं. केटलाक आभ्युदयिक श्राद्ध करेछे, ते, आचार छे माटे मुख्य नथी. १ अर्घ्यंदन एटले तेमां पूजनने माटे राखेला कळशो तेमां मंत्रोथी

कुशाग्राणि दधिदूर्वाक्षतास्तथा ॥ तिलाः सिद्धार्थकाश्चैव अंघगोऽर्घप्रकीर्तितः ॥ पुरतः धान्यराशिं कृत्वा ॥ तदुपरि कलशं निधाय ॥ विश्वाधारसीति मंत्रेण भूमीं स्पृष्ट्वा ॥ विश्वाधारासि धरणी शेषनागोपरिस्थिता ॥ धृतासि वराहेण सर्वकामफलप्रदा ॥ भूम्यै नमः ॥ हेमरूप्यादिसंभूतं ताम्रजं सुदृढं नवं ॥ कलशं धौतकल्मषं छिद्रवर्णविवर्जितं ॥ जीवनं सर्वजीवानां पावनं पावनात्मकं ॥ बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहं ॥ सूत्रं कार्पाससंभूतं ब्रह्मणा निर्मितं पुरा ॥ येन बद्धं जगत्सर्वं वेष्टनं कलशस्य च ॥ ओषधिः सर्ववृक्षाणां तृणगुल्मलतास्तथा ॥ दूर्वासर्षपसंयुक्ताः सर्वौषध्यः पुनातु माम् ॥ विविधं पुष्पसंजातं देवानां प्रीतिवर्धनं ॥ क्षिप्तं यत्कार्यसंभूतं कलशे निक्षिपाम्यहं ॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः ॥ पंचभंगा इति प्रोक्ताः सर्वकर्मसु-

पीपलो—उमरो—पीपरडी—आंबो—वड॥घोडो—हाथी—राफडो—संगम—एटले महानदी समुद्रनो—खाडो—राज्य—गायनी ॥ एटली ठेकाणेथी मटोडी लावी कलशमां नाखवी.

जल—धातु—मधु—चंदन फुल औषधि—सोपारी—पचरत्न—पचपल्लव नाखवा तथा ०॥—॥सोडा नव आना नाखवानो संप्रदाय छे, एनुं कारण एटलुंज छे के कलश रुपानो जोइये तेने बदले ए मुकवानो संप्रदाय छे.

कलशमां उपर कह्या प्रमाणे ते बधुं मुकी तेपर नालिकेर मूकी ढांकवु; पछी मटोडीनुं कोडियुं अथवा कांसानी वाडकी तेमां—पाणी—दूध—दहीं—

शोभनाः ॥ पूगीफलमिदं दिव्यं पवित्रं पापनाशनं ॥ पुत्रसौख्यादिफलदं कलशे निक्षिपाम्यहं ॥ हिरण्यं गर्भ-
गर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदं कलशे प्रक्षिपाम्यहं ॥ अश्वस्थानाद्गजस्थाना द्वल्मीकात्संगमाद्-
द्रात् ॥ राजद्वाराच्च गोगोष्ठान्मृदमानीय निक्षिपेत् ॥ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं ॥ एतानि
पंच रत्नानि कलशे प्रक्षिपाम्यहं ॥ पिधानं सर्ववस्तूनां सर्वकार्यार्थसाधनं पूर्णस्तु कलशो येन पात्रं तत्कल-
शोपरि ॥ अनेन पाद्यपात्रोपरि ताम्रमयं पूर्णपात्रं निधाय ॥ तदुपरि नालिकेरं निधाय । तत्र अर्घ्यपात्रोपरि
सवर्णपात्रं पिधाय रक्तसूत्रं वेष्टयित्वा ॥ पाद्यार्घपात्रे गंधपुष्पाक्षतैरभ्यर्च्य ॥ यजमानहस्ते मांगल्यं कृत्वा ।
धान्यदूर्वाप्रक्षेपः ॥ यजमानः स्वासनात् पश्चिमतः उत्तराभिमुखो भूत्वा तिष्ठेत् ॥ आचार्यः पत्नीहस्ते कलशं
दद्यात्॥यजमानहस्ते अर्घ्यं च॥सुमुहूर्तादि कर्त्तव्यं शोभने मंडपे द्विजः॥ शांतिपाठोऽर्घदानं च प्रच्छापूर्वं समाच-

दुर्वा–अक्षत–तिल–सरसव–विगेरे नांखी तेना पर बीजुं पात्र ढांकी तेनापर नाडुं मुकी एक पाद्यनो कलश तथा अने अबील गुलालथी सुशोभित करवा. पछी सपत्नीक यजमानना हाथमां कुंकुम तथा भातलाखी यजमान पत्नीना हाथमां कलश तथा यजमानना हाथमां अर्घ्य आपी पाटलानी नीचे उत्तरनुं मोढुं करावी उभाराखी मंत्र भणाववा. नहीं तो ब्राह्मणोने मोढेथी सांभळी, अर्थ समजी, आ पाद्यपात्र तथा अर्घ्यनो एम कहि आपी पोताना आसन पर बेसवुं.

रेत् ॥ १ ॥ मम क्षेमायुरारोग्यं परमश्रीसुखाप्तये ॥ सर्वंधुसुतभार्यस्य वांछितार्थस्य सिद्धये ॥ २ ॥ आधिव्याधि-
जरामृत्युभयशोकापन्हुतये ॥ भूतभव्यभविष्येति त्रिविधोत्पातशांतये ॥ ३ ॥ सर्वेनं साममध्यस्तोर्निरस्तेश्च
सुरद्विषाम् ॥ सर्वसौभाग्यसंपत्यै निष्पत्यै अस्य कर्मणः ॥ ४ ॥ आचार्यादिसमस्तानां जापकानां द्विजन्मनाम्॥
पादार्घं प्रकरिष्येऽहं आज्ञां देहि ममाध्वरे ॥ ५ ॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ॥ अनुगृण्हंतु
मामद्य ग्रहयज्ञाख्यकर्मणि ॥ ६ ॥ स्वस्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः॥ श्रोत्रियाः सत्यवादाश्च देवध्या-
नरताः सदा ॥ ७ ॥ यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥ अंगीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः ॥
॥ ८ ॥ यथोक्तनियमैर्युक्ता मंत्रार्थे स्थिरबुद्धयः ॥ यत्कृपालोचनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः ॥ ९ ॥ स्वागतं
भो द्विजश्रेष्ठा मदनुग्रहकारकाः ॥ अयमर्घमिदं पाद्यं भवाद्भिः प्रतिगृह्यतां ॥ १० ॥ अर्घोऽर्घोऽर्घः ॥ प्रतिगृह्यतां

* गृह्य-मंत्रभाष्ये ॥ आचार्यं वृणुयात्पूर्वं ब्रह्माणं तदनंतरं ॥ परशुरामेणापि ॥ आचार्यादिसमस्तानां जापकानां द्विजन्मनां ॥ आचार्यं प्राङ्मुखमुपविश्य ॥

अर्थ -उपरना मंत्रोभणी रहे ब्राह्मणो, त्यारपछी यजमाने केहेवुं प्रतिगृह्यताम् पछी ब्राह्मणोए प्रतिगृह्णामि कहि ते वेउना हाथमांथी कळश अने लइ नीचे मुकवा यजमाने पोताना पाटलापर बेसी ब्राह्मणवरणनो संकल्प करवो.

आचार्यादिऋत्विजां वरणमहं करिष्ये ॥ यजमानः
इति यजमानः ॥प्रतिगृह्णामि इति द्विजः ॥ जलं गृहीत्वा ॥ शक्रादीनां यथा स्वर्गे आचार्यो वा बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्ना
हस्ते सयवपुष्पपूगीफलं गृहीत्वा ॥ शक्रादीनां यथा स्वर्गे आचार्यो वा बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्ना
चार्यो भव सुव्रत ॥ मंत्रमूर्तिभवन्नाथ संसारोच्छेदकारकः ॥ पूजार्हस्तु यथादेवः कुरुधर्मो ह्युतिंचन ॥
संसारभयभीतेने अयं यज्ञः सुभक्तितः ॥ प्रारब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवेदिति ॥ भगवन्सर्वधर्मज्ञ
सर्वधर्मपरायण ॥ सर्वशास्त्रार्थतत्वज्ञ सर्वशास्त्रविशारद ॥ अनादिजन्मसंतान ह्यप्रमेय भवार्णवे ॥ अद्य
मे ह्युत्तमं जन्म अद्य मे सफलं धनं ॥ अद्य मे जननोच्छित्तिरद्य मे परमं पदं ॥ मोचितोऽहं त्वया
नाथ दुच्छेद्याद्भवबंधनात् ॥ संत्रातोऽहं त्वया अस्मादप्रमेयाद्भवार्णवात् ॥ मुक्तोऽहं मर्त्यसंसारात् प्रपन्नोऽहं तवा-
न्तिकम् ॥ पूगीफलं आचार्याय दत्वा ॥ पुष्पं शिरसि निधाय ॥ यथैः जानु स्पृशेत् अमुकगोत्रोऽमुकप्रवरो

यजमान उदङ्मुखो भूत्वा ॥ सयवपूगीफलपुष्पे गृहीत्वा अंजलिं बध्वा आचार्यं प्रार्थयेत् ॥

—अहीं यजमाने उत्तराभिमुखे बेसी हाथमां सोपारी अक्षत पुष्प लइ आचार्यवरण पेहेलाथी करवु तेमा प्रथम प्रार्थना करी सोपारी आपी आचार्यना गोठणे जयी अडकी गोत्रादि ब्राह्मणना बोल्याथी यजमाने पोताना गोत्रोच्चार बोली अमुककर्ममां आचार्यकर्म करवा हुं तमने आचार्य वरुं, एम कही जव आपी पुष्प माथा पर मुकवु तथा आचार्यना ने पग तरभाणमा मुकवा. पाद पात्रनो कळशके तेमायी पाणी ज्ञण वखत पगउपर रेडी आचार्यना

ऽमुकयजमानोऽहं करिष्यमाणकर्मणि आचार्यकर्मकरणार्थं अमुकगोत्रं अमुकप्रवरं अमुकवेदांतर्गतअमुकशाखाध्यायिनममुकशर्माणं ब्राह्मणं साक्षतचंदनवासोभिः आचार्यत्वेन त्वामहं वृणे वृतोऽस्मि ॥ वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षाळनं इदमत्र चंदनमालिका च हस्ते कंकणबंधनम् ॥ प्रतिज्ञावरणं चैव स्वस्तिपुण्याहवाचनम् ॥ कपिलाय नमस्तुभ्यं रक्षाकंकणबंधनम् ॥ हस्तमुद्रा कर्णमुद्रा आसनादिसामग्रीं यज्ञोपवीतं वस्त्रं च दत्त्वा ॥

स्वनामगोत्रप्रवरान्संकीर्त्य ब्राह्मणस्य च ॥ अस्मिन्यज्ञेऽमुकं देवं त्वामहं ऋत्विजं वृणे ॥ इत्युक्त्वा तु फलं दद्यात्करे तस्यैव पूजनम् ॥ इति कल्पवल्ल्याम् ॥ तत्र ब्रह्मा स्वशाखीयः कर्तव्य ॥

हाथेथी पग धोइ. पछी अर्घ करेलछे तेमाथी एक चमच पाणी आचार्यना बेहाथमा आपवु. पछी शुद्धपात्रमाथी एक आचमनी भरिने जळ पाद्य हाथमां आपवुं पछी चदन फुलमाथापर मुकवु. तथा कपाळे चदन करी कुकुमनो चाल्लो करी चोखा चोडी पुष्पनो हार पेहेरावी जमणे हाथे नाडु बांधवुं. तथा आसन गौमुखी माळा आचमनी तरभाण पत्रोपपात्र (अथवा प्यालो) तथा वस्त्र उपवस्त्र जनोइ मुद्रिका विगेरे. लावेली वस्तुओ तथा दक्षिणा आचार्यने आपी कहेवु के हे आचार्य ! ज्यालगी आ मारुं कार्य सपूर्ण थाय त्यासुधी तमारे आचार्यनु कर्त्तव्य कर्म करवुं तेटलामाटे तमने आचार्य कर्याछे. एम कह्यापछी आचार्ये केहेवु तमो उत्तम कार्य करवा तैयार थयाछो, तो सर्वकर्मकरावनार आचार्य थाउछुं. पछी आचार्यना पूजनना क्रम प्रमाणे यजमाननी शाखानोज ब्रह्मा करवो तेना मंत्रोविगेरेथी प्रार्थना करी ब्रह्मानु वरण करवुं तथा गाणपत्यादि तथा द्वारपाळ विगेरे ऋत्विजोनुं जुदुं पूजन श्रद्धापूर्वक करवुं.

यावत्कर्म समाप्यते तावत्त्वं आचार्यो भव ॥ भवामि इत्याचार्यः ॥ पूर्ववत् ॥ यवपुष्पपूगीफलं गृहीत्वा ॥ ब्रह्माणं वृणुयात् ॥ यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ आवाहयामि देवेशं ब्रह्माणं कमलोद्भवं ॥ चतुर्वेदसमायुक्तं सर्वसिद्धांतवेदिनम् ॥ प्रार्थ्य ॥ पूगीफलं हस्ते दत्वा पुष्पं शिरसि निधाय यर्वैजानु स्पृशेत् ॥ अमुकगोत्रोऽमुकप्रवरोऽमुकयजमानोऽहं करिष्यमाणकर्मण्यंगभूतकृताकृतावेक्षणार्थं अमुकगोत्रममुकप्रवरममुकवेदांतर्गतामुकशाखाध्यायिनममुकशर्माणं ब्राह्मणं साक्षतद्रव्यचंदनवासोभिः ब्रह्मत्वेन त्वामहं वृणे व्रतोऽस्मि इति प्रतिवचनम् ॥ व्रताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं इदमत्र चंदन म लिकां च हस्ते कंकणबंधनम् ॥ प्रतिज्ञा वरणं चैव० ॥ हस्तमुद्रा कर्णमुद्रा० ॥ यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव ॥ भवामि ॥ साक्षतपूगीफलं गृहीत्वा गाणपत्यं प्रार्थयेत् ॥ ऋत्विग्भिः सहितो ब्रह्मन्संयुतैः सुसमाहितैः ॥ आचार्येण च संयुक्तः कुरु कर्म यथोदितं ॥ वांछितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः ॥ निर्विघ्नकार्यसंसिद्ध्यै त्वामहं गणपं वृणे ॥ त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणः ॥ आचार्यादिभिः सयुक्तः कुरु कर्म यथोदितं ॥ फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र० यजमानोऽहं० ॥ अमुकगोत्रं० ब्राह्मणं गाणपत्यत्वेन त्वामहं वृणे ॥

व्रतोऽस्मि पाद्यं॰ यावत्कर्म समाप्यते तावत्त्वं गाणपत्यो भव॥ सदस्यं वृणुयात् ॥कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमम् ॥ कर्मिणं वेदतत्त्वज्ञं सदस्यं त्वामहं वृणे ॥ फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र॰ यजमानोऽहं॰ ॥ अमुकगोत्रं॰ ब्राह्मणं सादस्यत्वेन त्वामहं वृणे व्रतोऽस्मि पाद्यं॰ यावत्कर्म समाप्यते तावत्त्वं सादस्यो भव ॥ सर्वोपद्रष्टारं वृणुयात् ॥ अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया ॥ सर्वोपद्रष्टकर्तव्यं कर्मेदं विधिपूर्वकं ॥ फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र॰ यजमानोऽहं॰ ॥ अमुकगोत्रं॰ ब्राह्मणं सर्वोपद्रष्टारं त्वामहं वृणे ॥ व्रतोऽस्मि पाद्यं॰यावत्कर्म समाप्यते तावत्त्वं सर्वोपद्रष्टा भव॥ऋग्वेदिनं वृणुयात्॥ऋग्वेदः पद्म पत्राक्षो गायत्रः सोमदैवतः॥ अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥फलं दत्वा पूर्ववत् पूजनं ॥अमुकगोत्र॰यजमानोऽहं ॥ अमुकगोत्रं॰ ब्राह्मणं ऋग्वेदिनं त्वामहं वृणे व्रतोऽस्मि पाद्यं॰ यावत्कर्म समाप्यते तावत्त्वं ऋग्वेदसूक्तजापको भव ॥ यजुर्वेदिनं वृणुयात॥कातराक्षो यजुर्वेदः त्रैष्टु भो विष्णुदैवतः॥ काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र॰ यजमानोऽहं॰ ॥ अमुकगोत्रं ब्राह्मणं यजुर्वेदिनं त्वामहं वृणे व्रतोऽस्मि पाद्यं॰ यावत्कर्म समाप्यते तावत्त्वं यजुर्वेदसूक्तजापको भव ॥ सामवेदिनं वृणुयात् ॥ सामवेदस्तु, पिंगाक्षो जाग्रतः

शक्रदैवतः ॥ भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र० यजमा-
नोऽहं० ॥ अमुकगोत्रं० ब्राह्मणं सामवेदिनं त्वामहं वृणे व्रतोऽस्मि पाद्यं० यावत्कर्म समाप्यते तावत्त्वं सामवे-
दसूक्तजापको भव ॥ अथर्ववेदिनं वृणुयात् ॥ बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः ॥ वैशंपायनविप्रेन्द्र ऋत्विक
त्वं मे मखे भव ॥ फलं दत्वा पूर्ववत्पूजनं ॥ अमुकगोत्र० यजमानोऽहं० ॥ अमुकगोत्रं० ब्राह्मणं अथर्ववेदिनं
त्वामहं वृणे व्रतोऽस्मि पाद्यं० यावत्कर्म समाप्यते तावत्त्वं अथर्ववेदसूक्तजापको भव ॥ ऋत्विक्वरणं ॥ भगव-
न्सर्वधर्मज्ञ सर्वधर्मभृतांवर ॥ वितते मम यज्ञेऽस्मिन् ऋत्विक्त्वं भव सुव्रत ॥ फलं दत्वा पूर्ववत्पूजनं ॥अमुक-
गोत्र० यजमानोऽहं० ॥ अमुकगोत्रं० ब्राह्मणं ऋत्विजं वृणे व्रतोऽस्मि पाद्यं०यावत्कर्म समाप्यते तावत्त्वं ऋत्विक्
भव ॥ अथ ब्राह्मणप्रार्थना ॥ क्षमा तपोदयादानं सत्यं शौचं च संयमः ॥ विद्याविनयसंयुक्ता ब्राह्मणा लोक-

---

अर्थ—अहो महारायज्ञमां आवेला द्विजो तमो विद्यादि गुणोये करि युक्तछो. तथा सत्य शौचादिये करि चालवावाळां छो तथा देवताओपर श्रद्धा राखवावाळा छो तथा धर्म शास्त्रमां कहेला नीयमो पाळनार छो तथा संध्या स्नानादि वेदने मानवावाळा छो एम तमोने हुं मानुं छुं. तो हे भूमिदेवो! आ मारा कार्यमां श्रद्धाराखी निर्विघ्न परिपूर्णकरि आपनुं. आ प्रमाणे ब्राह्मणोनी प्रार्थना अनेक प्रकारे करवी.

तारकाः ॥ यजनं याजनं चैव ध्ययनाध्यापनं तथा ॥ दानप्रतिग्रहो होमः षट्कर्मनिरतः सदा ॥ त्रिकालसंध्याकरणे स्वाध्यायाचरणे तथा ॥ नानाशास्त्राभ्यासरताः संसारोच्छेद कारकाः ॥ भवद्दर्शनमात्रेण मुक्तास्तु भवबंधनात् ॥ अभिशुश्रूषणरता धर्ममार्गे दृढव्रताः ॥ परदारपरद्रव्यपरनिंदाविवर्जिताः ॥ भवतां दर्शनेनैव शुद्ध्यंति मलिनो जनाः ॥ भूमीदेवास्तु विप्रा वै त्रिषु लोकेषु विश्रुताः ॥ अस्मिन्कर्मणि सर्वे वै सहायाः सन्तु सर्वदा ॥ ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः ॥ वेदानां चैव दातारः पातारः सर्वदेहिनां ॥ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ॥ देवानां पितृणां चैव तृप्त्यर्थं याजकाः कृताः ॥ येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं ॥ रक्षन्तु सततं ते मां जपयज्ञेष्ववस्थिताः ॥ ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतं ॥ तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः ॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ॥ सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥ श्रोत्रियाः सत्यवादाश्च देवध्यानरताःसदा ॥ यद्वाक्यामृतसंसिक्ता ऋद्धिंयांति नरोत्तमाः ॥ अंगीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्ता मंत्रार्थे स्थिरबुद्धयः ॥यत्कृपालोचनात्सर्वाः ऋद्धयो वृद्धिमाप्नुयुः ॥ मम यज्ञे जपे पूज्याः सन्तु मे नियमान्विताः ॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥

देवध्यानरता नित्यं प्रसन्नमनसः सदा ॥ अदुष्टभाषिणः संतु मा सन्तु परनिंदकाः॥ ममापि नियमा ह्येते भवन्तु भवतामपि ॥ इति संप्रार्थ्य ॥ ब्राह्मणाः ब्रूयुः ॥ वयं नियमसंयुक्ता तव कर्तव्यतत्पराः ॥ कार्यं तव करिष्यामो विधिपूर्वं न संशयः॥ कर्तव्या नो क्रियाशंका वेदाज्ञा हि गरीयसी ॥ वैदिका नहि वेदाज्ञां लंघयंति कदाचन ॥ त्वदधीनं त्वया कार्यं निश्शंकं श्रद्धयान्वितम् ॥ वयं सर्वं करिष्यामस्तव कार्यं न संशयः ॥ यजमानः ॥ धन्योऽहं कृतकृत्योऽहं सौभाग्योऽहं धरातले ॥ प्रसादाद्भवतांविप्राः पवित्रोऽहं कृतोऽधुना ॥ मेरुमंदरतुल्योऽहं भवद्भिर्भूतलेकृतः॥ यशोविस्तारि तं मेद्य लक्ष्मीवृद्धिश्च मे कृताः॥ अद्यमे पितरः तृप्ताः पवित्रं मे कुलं कृतं ॥ देवतानां प्रसादोऽपि जातो मे चैव निर्मलः ॥ कार्यं कर्तुं न मे शक्तिर्नैव दातुं च दक्षिणा ॥ न च पूजाविधानं च नमस्कारं करोम्यहं ॥ शक्त्या सर्वं करिष्यामि वचनात् भवतां ततः ॥ आशिर्वादाच्च सिद्धानां पूर्णं सर्वं भविष्यति ॥ इति आचार्यादीन्संप्रार्थ्य ॥ वैरणश्राद्धंकुर्यात ॥ स्वपादौ करौ प्रक्षाल्याचम्य॥ अक्षतैर्दिग्बंधः॥ आचाराद्वरणश्राद्धम् ॥ परशुरामोक्तेः ॥ यमादिभ्यः समस्तेभ्य ऋषिभ्य इदमासनम् ॥ गंधपुष्पं च धूपं च वरणश्राद्धे प्रकल्पयेत्

अर्थ–ब्राह्मणोए कहेतुं के तमो श्रद्धापूर्वक करोछो तो अमो शास्त्रमां कहेला नियमो पाळी सांग कर्म करावीशुं. वळी यजमाने केहेवुंके हे भूदेवो! तमारा योग्य आपनानी कोई पण रीतनी मारी शक्ति नथी पण जे माराथी बने तेमां ज संतोष मानी दया राखी आशिर्वाद आपवो. हवे पूजेला ब्राह्मणोनुं वरण

स्वस्तियाचा० ॥ चतुर्षु दिक्षु अक्षतान् विकीर्य ॥ आयांतु सांकल्पेन विधिना वरणश्राद्धोपहाराः पवित्राःसन्तु देशकालपात्रान्नद्रव्यश्रद्धा संपदस्तु ॥ अद्येत्यादि० अमुकवारान्वितायां सांकल्पेनविधिना वरणश्राद्धं करिष्ये ॥ हस्ते जलं गृहीत्वा ॥ आचार्यादिऋत्विजाम् आसनं संपन्नं सुसंपन्नं आचार्यादिऋत्विग्भ्यः यथादत्तं गंधाद्यर्चनं संपन्नं सुसंपन्नं अर्चनविधेः परिपूर्णतास्तु दीपादीनां प्रदत्तानां इदं वो ज्योतिः सूज्योतिः शेषोपचारा विधिवद्भवंतु ॥ आचार्यादिऋत्विग्भ्यो अद्येह भोजनं संपन्नं सुसंपन्नं आचार्यादिऋत्विग्भ्यो दक्षिणाः संपन्नाः सुसंपन्नाः ॥ तिलकमाशिर्वादः ॥ कौतुकबंधनं ॥ येन बद्धो बली राजा दानवेंद्रो महाबलः ॥ तेन

आचारात् कंकण बंधनंपरं च भविष्ये—दुर्वा यवाङ्कुरा श्चैव बालकं नूतपल्लवाः ॥ हरिद्राद्वयसिद्धार्थः शिखिपक्षो रगत्वचः ॥ कंकणौषधयश्चैताः कौतुकाख्या नव स्मृताः ॥ अथवा ॥ यवाङ्कुरांस्तथा दूर्वाः शर्षपान् गंधसंयुतान् ॥ गोमयं दधिसंयुक्तं कारयेत्ताम्रभाजने ॥ तन्नाजनं करपुटे धृत्वा मंत्रान् पठेच्च प्रोक्षयेत् ॥

श्राद्ध करवुं. तेमां, पहेलाथी यजमाने पोताना बेउहाथ पग धोइ आचमनकरी चारदिशाए अक्षतवेरी पूजाना साहित्यने प्रोक्षण करी संकल्प करवो, तथा आसन गंध भोजन दक्षणा विगेरे आपेली वस्तुओ तथा आपवानी वस्तुओनो संकल्प करवो, तथा ब्राह्मणे यजमानने चांलोकरी हाथे नाडु बांधी यजमानपत्नीने डाबाहाथे नाडु बांधवुं.

त्वामपि बध्नामि रक्षे रक्ष हिमाचल ॥ १ ॥ मांगल्यतन्तुना येन भर्तुर्जीवनहेतुना ॥ हस्ते बध्नामि सुभगे सजीव शरदः शतं ॥ २ ॥ पत्नीवामकरे सूत्रं बध्वा सौख्यधनागमम् ॥ बहु संपत्ति मारोग्यं रक्षार्थे कंकणं शुभं ॥ इति कौतुक बंधनम् ॥ **अथ स्वस्ति पुण्याह वाचनम्** ॥ पूर्व संपादित कलशे वा विश्वाधारासीत्यादिपूर्वोक्तमंत्रैः कलशे पूर्णपात्रान्तं कृत्वा ॥ ततः स्वाग्रे धान्यराशौ कलशं संस्थाप्य ॥ तत्र गंधदूर्वापंचपल्लवफल हेम पंचरत्नादीनि क्षिप्त्वा तदुपरि धान्यपूरितपूर्ण पात्रं निधाय तदुपरि नालिकेरं निधाय वाससि वेष्टयित्वा ॥ कलशं स्पृष्ट्वा ॥ आवाहयामि कलशं सप्तसागरसंस्थितम् सर्वलक्षणसंपूर्णं नदीनां च स-

परशुराम ॥ कृत्वैवं वरुणं पूर्वं माध्यं पुण्याहवाचनमिति ॥ अथ पंचोपचाराः ॥ गंध, पुष्प, धूप, दीप, नैवेद्य, इति पंचकं ॥ पंचोपचार-माख्याते पूजने तत्वविद् बुधैः ॥ इति कमलाकरे ॥ पुण्याहवाचनमृद्धौ पूर्तौ च ॥ इति कात्यायनः ॥ ऋद्धिश्चैव तु संस्काराः विवाहाद्याः प्रकीर्तिताः ॥ प्रतिष्ठोद्यापनादीनी पूर्वं कर्म यथोचितं.

अर्थ—हवे स्वस्तिवाचन करवुं तेमां पोताना सामी चोखानी ढगलीकरी तेनापर कलश मुकी तेमां अगाडीना पत्रमां कहेला "विश्वाधारासीति" आरंभी पूर्ण पात्र सुधीना मंत्रो भणी कलशना पदार्थ मूकाववा तथा वरुणनो आवाहननो मंत्रभणी आवाहनकरी प्रतिष्ठाकरी पंचोपचारथी पूजन करावतुं.

गांकुलम् ॥ १ ॥ उत्तरे हिमवन्तस्य क्षीरोदानामसागरः ॥ उत्पन्नं कलशं तत्र सर्वतीर्थं समन्वितः ॥ २ ॥ कलाकलादिदेवानां दानवानां तथैव च ॥ कलापि सकला ग्राह्या सौम्य मांगल्य कर्मणि ॥ ३ ॥ निर्मितोऽयं तदा तत्र कलशं तेन उच्यते ॥ रचितं विश्वरूपेण कलशं कामरूपिणम् ॥ ४ ॥ सर्वे समुद्रा सरितस्तीर्थानि जलदानदाः ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ ५ ॥ अर्जुनी गोमती चैव चंद्रभागा सरस्वती ॥ कावेरी कृष्णवेणी च गंगाचैव महानदी ॥ ६ ॥ क्षिप्रा वेत्रवती पूर्णाचर्मन्वती च वेदिका ॥ तापी गोदावरी चैव नर्मदा च मही तथा ॥ ७ ॥ पाराशरी पयोष्णी च सरयू गण्डकी तथा ॥ ज्वालेश्वरं महातीर्थं तीर्थं वाऽमरकंटकम् ॥ ८ ॥ केदारंच प्रयागं च यमुना सुरदीर्घिका ॥ विन्ध्यपादे च तीर्थानि श्रीपादे यानि तानि च ॥ प्रभासं पुष्करं चैव नैमिषं च हिमालयं ॥ ९ ॥ शालिग्रामं च गोकर्णं कुंभेऽस्मिन् संप्रतिष्ठितम् ॥ पृथिव्यां यानि तीर्थानि पाताले सन्ति यानि च ॥ १० ॥ तानि तिष्ठंति कुंभेऽस्मिन्वरुणं कल्पयाम्यहम् ॥ गंगे च यमुनेचैव गोदावरी सरस्वती ॥ ११ ॥ नर्मदे सिंधुकावेरी जलेस्मिन्सन्निधिं कुरु ॥ सर्वे समुद्रा सरित स्तीर्थानि जलदानदाः ॥ १२ ॥ आयान्तु यजमानस्य दुरित क्षयकारकाः ॥ वृषारूढा सरोजाक्षी पद्महस्तां बुजेक्षणा ॥ १३ ॥ आयान्तु

यमुना देवी कूर्म वाहन गासदा ॥ प्राची सरस्वती पुण्या तथा मंदाकिनी परा ॥ १४ ॥ एतानद्यश्च
तीर्थानि गुह्यक्षेत्राणि सर्वशः ॥ तानि सर्वाणि कुंभेस्मिन्विशंतु ब्रह्मशासनात् ॥ १५ ॥ तीर्थान्यावाह्य ॥
अक्षतान् गृहीत्वा ॥ प्रतिष्ठसर्व० अस्मिन्कलशे वरुणः सुप्रातिष्ठितो वरदो भव ॥ प्रतिष्ठान्ते पूजनं अस्मिन्कलशे
वरुणाय नमः गंधंस० अस्मिन्कलशे वरुणायनमः पुष्पं स० अस्मि० वरु० धूपं स० अस्मि० वरु० दीपं स० अस्मि०
वरु० नैवेद्यं स० अस्मिन्कलशे सुशोभनार्थे सौभाग्यद्रव्याणि स० अनेन पंचोपचारैःपूजनेन वरुणः प्रीयतां हस्ते
पुष्पं गृहीत्वा ॥ प्रार्थयेत् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूले तस्यस्थितो ब्रह्मा मध्ये मातृगणा
स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्त द्विपा वसुंधरा ॥ ऋगवेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ २ ॥ अंगै-
श्वसहिताः सर्वे कलशं तु समाश्रिताः ॥ शंखस्फटिकवर्णाभः श्वेतहाराम्बरावृतः ॥ ३ ॥ पाशहस्त महाबाहो
दयां कुरु दयानिधे ॥ पाशपाणे नमस्तुभ्यं पद्मिनी जीवनाय च ॥ पुण्याहवाचनं यावत्तावत्त्वं सुस्थिरो भव
॥ ४ ॥ नमो नमस्ते स्फटिकप्रभाय शुश्वेतहाराय सुमंगलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय
नमो नमस्ते ॥ वरुणाय नमः प्रार्थनापूर्वकं नमस्कारं समर्पयामि ॥ मातृदेवो भव पितृदेवो भव ॥ आचार्यदेवो

भव ॥ अतिथिदेवो भव ॥ आशिषः प्रार्थयन्ते ॥ अवनि कृत जानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णं कलशं धारयित्वा ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेन आयुः प्रमाणेन पुण्याहं दीर्घमायुरस्त्वितिभवंतो ब्रुवन्तु ॥ इति यजमानः ॥ पुण्यं पुण्याहं दीर्घमायुरस्त्विति द्विजाः ॥ एवं वारत्रयं कृत्वा ॥ कलशं भूमौ स्वस्थाने संस्थाप्य ॥ ब्राह्मणानां हस्ते सुप्रोक्षितमस्तु ॥ शिवा आपः संतु ॥

तत्र वेदव्यासः ॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ॥ धर्मकर्मणि मांगल्ये संग्रामेऽद्भुतदर्शने ॥ १ ॥ पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ॥ ओंकारपूर्वं विप्रस्य भवेत्पुण्याहवाचनं ॥ एतदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोः ॥ उपांशु च तथा वैश्ये स्वस्ति शूद्रे च वाचयेत् ॥ स्थापयेदव्रणं कुंभं पंचपल्लवसंयुतं ॥ पंचरत्नसमायुक्तं युग्मवस्त्रेण वेष्टितं ॥ संगृह्य पाणिनाचार्यो वाचयेत्स्वस्ति वाचनम् ॥

* आचार्यलक्षणं ॥ तल्लक्षणतः प्रश्नप्रतिवचनसमर्थान् तद्दिवसे श्राद्धादिष्वभुक्तवन्तो निषिद्धप्रतिग्रहनिवृत्तान्तः कर्णाच्छुचिं सोत्तरीया-न्दर्भ पवित्रपाणियुग्मान् ब्राह्मणा नुदङ्मुखान् आसने उपविश्य ॥ गुर्वादीन्नत्वा ततत्कलशहस्ताभ्यामादाय आशिषः प्रार्थयेत् ॥ २ ॥ एवं सर्वत्र यजमानवचनोत्तरं ब्राह्मणाः प्रतिवचनं दद्युः ॥

अर्थ–पंचोपचार पूजनकरी हाथमां फूलल्इ प्रार्थनाकरी नमस्कारकरवो पछी यजमानना हाथमां कंकु भात दरोइ आपी बेगोठणपृथ्वीने अडकाडी, कमलना जेवा बे हाथ एकत्र करी कलशने पोतानामाथे अडकाडी राखवो.(पछी ते कलश माथे तथा पृथ्वीपरत्रणवखत अडकाडवो)(एरुडीछे.) कलशनीचे मूकी पाछा स्वस्तिवेळी चार ब्राह्मणना हाथमां चदन फूल चोखा पान सोपारी दक्षिणा आपी फरी पाणी आपवुं.

संतु शिवा आपः सौमनस्यमस्तु ॥ अस्तु सौमनस्यं ॥ अक्षतं चारिष्टं चास्तु ॥ अस्त्वक्षतमरिष्टं च ॥ गंधाः पांतु सौमंगल्यं चास्त्विति भवंतो ब्रुवन्तु ॥ गंधाः पांतु सौमंगल्यं चास्तु ॥ एवं सर्वत्र ॥ अक्षताः पांतु आयुष्यमस्त्वि० अक्षताः पांतुआयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्त्विति० पुष्पाणि पांतु सौश्रियमस्तु ॥ तांबूलानि पान्तु ऐश्वर्यमस्त्विति० तांबूलानी पान्तु ऐश्वर्य मस्तु ॥ दक्षिणाः पान्तु बहुधनमस्त्विति० दक्षिणाःपांतु बहुधनमस्तु ॥ पुनरत्राः पान्तु स्वर्चितमस्त्वि० पुनरत्राः पान्तु स्वर्चितमस्तु ॥ यजमानो आचार्यादीन् प्रणम्य श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्त्वि० श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ अनेन यजमानमूर्ध्न्यभिषिंचेयुः॥यंकृत्वा सर्ववेद यज्ञक्रिया करणकर्मारंभाः प्रवर्तते॥ तमहमोंकार मादिंकृत्वा ऋग्यजुः सामाशीर्वचनं

मंत्रिप्रसंग्रहे ॥ अपां मध्ये स्थिता देवाः सर्वे चाप्सु प्रतिष्ठिताः ॥ ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु नः ॥ १ ॥ लक्ष्मीर्वसति पुष्पाग्रे लक्ष्मीर्वसति पुष्करे ॥ सा मे वसतु वै नित्यं सौमनस्यं तथास्तु नः ॥ २ ॥ अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशो बलं ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ३ ॥ शतो अमरे ॥ अरिष्टमशुभे तक्रे सूतिकागार आसवे शुभे मरणचिन्हेष्विति मेदिनि ॥

अर्थ—यजमाने आपेलुं पाणी यजमानना माथापर छांटवुं, तथा अक्षतलइ यजमानपत्नीना तथा यजमानना खोळामां मंत्रो भणीनांखवा ॥

यद्दुक्तमिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥ वाच्यतां ॥ इति तैरुक्ते ॥ ब्राह्मणानां हस्ते अक्षतान् दद्यात्॥ ते चाशिषो दद्युः॥ यजमानः॥ माविघ्नं माच मे पापं मासन्तु परिपंथिनः॥ सौम्या भवन्तु सुखिनः सर्वेलोकाः सुखावहाः ॥ इति कर्ता वदेत ॥ विप्रास्तथास्त्वित्युक्त्वा ॥ करोतु स्वस्ति ते ब्रह्मा स्वस्तिचापि द्विजातयः ॥ सरीसृपाश्च ये श्रेष्ठास्तेभ्य स्ते स्वस्ति सर्वदा ॥ १ ॥ ययातिर्नहुष श्चैव धुन्धुमारो भगीरथः ॥ तुभ्यं राजर्षयःसर्वे स्वस्ति कुर्वन्तु नित्यशः ॥ २॥ स्वस्ति तेऽस्तु द्विपादेभ्य श्चतुष्पादेभ्य एव च ॥ स्वस्त्यस्तुपावकेभ्यश्च सर्वेभ्यः स्वस्ति सर्वदा ॥ ३ ॥ स्वाहा स्वधा शचीचैव स्वस्ति कुर्वन्तु ते सदा ॥ लक्ष्मी रुन्धती चैव कुरुतां स्वस्ति तेऽनघ ॥ ४ ॥ असितो देवलश्चैव विश्वामित्रस्तथांगिरः ॥ स्वस्ति तेऽद्यःप्रयच्छन्तु कार्तिकेयश्च षण्मुखः ॥ ५ ॥ विवस्वान् भगवान्स्वस्ति करोतु तव सर्वशः ॥ दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः ॥ ६ ॥ अधस्ताद्धरणी योऽसौ नागो धारयते सदा ॥ शेषश्च पन्नगश्रेष्ठःस्वस्ति तुभ्यं प्रयच्छतु ॥ ७ ॥ इति वदेयुः ॥ (इत्येता ऋचःपुण्याहे ब्रूयात) व्रत जप नियम तप स्वाध्याय क्रतु दया दमदान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ समाहितमनसःस्म इति द्विजाः ॥ प्रसीदंतु भवंतः प्रसन्नाः स्मः ॥ शांतिरस्तु ॥

अस्तु शांतिः इति द्विजाः ॥ प्रतिवचनं सर्वत्र दद्युः ॥ आस्त्वित्युक्ते कुंभाज्जलं पातयेत् ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ अविघ्नमस्तु ॥ आयुष्यमस्तु ॥ आरोग्यमस्तु ॥शिवं कर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ पुत्रपौत्रसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ अरिष्टनिरसनमस्तु॥ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरे कर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ उत्तरोत्तरः क्रियाः शुभाः शोभनाः संपद्यंताम् ॥ तिथि करण मुहूर्तनक्षत्र ग्रहलग्नसंपदस्तु ॥ तिथिकरण मुहूर्तनक्षत्रग्रह लग्नाधिदेवताः प्रीयंताम् ॥ तिथिकरणे सुमुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम् ॥ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् ॥ इन्द्र पुरोगाः मरुद्गणाः प्रीयन्ताम् ॥ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्॥ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ॥ विष्णुपुरोगाः सर्वदेवाः प्रीयन्ताम् ॥ब्रह्म पुरोगाः सर्वे वेदाःप्रीयन्ताम् ॥

यद्यपि शौनकेन शांतिरस्त्वित्यादीनि पंचदश वचनान्युक्तानि ॥ तथापि प्रयोगरत्नादौ ॥ अधिकान्यपि दृश्यंते ॥ तदनुसारेणात्र लिखितानि ॥ अस्त्विति समये पात्रमध्ये जलमोचनं कार्यमित्युक्तं प्रयोगचूडामणौ ॥ पात्रे मुंचंति अरिष्टांबुनिरसनं द्विवारं पश्चिमेत्युक्तं ॥ प्रयोगचूडामणौ शांतिरस्त्विति विख्याताः शब्दाः पंचदशैव तु ॥ संस्कारभास्करे ॥ प्रीयतां वाक्यपठितैरुदकस्य निषेचनम् ॥

अर्थ-शांतिरस्तुथी आरम करीने " अविघ्नमस्तु " अहीं स्गीना वाक्यो बोलता जइने कलशनु पाणि पश्चिमदिशामा नाखवु ॥ जेपरना प्रीयता वाक्यो बोलता नई तरभाणामा पाणि नाखवुं ॥

वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् ॥ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ श्रीसरस्वत्यौ प्रीयेताम् ॥ श्रद्धामेधे प्रीये-ताम् ॥ भगवती कात्यायनी प्रीयताम् ॥ भगवती माहेश्वरी प्रीयताम् ॥ भगवती ऋद्धिकरी प्रीयताम्॥भगवती सिद्धिकरी प्रीयताम् ॥ भगवती पुष्टिकरी प्रीयताम् ॥ भगवती तुष्टिकरी प्रीयताम् ॥ भगवन्तौ विघ्नविनायकौ प्रीयेताम् ॥ सर्वाः कुलदेवताः प्रीयन्ताम् ॥ सर्वाः ग्रामदेवताः प्रीयन्ताम् ॥ हताश्च ब्रह्मद्विषः हताश्च परिपंथि-नः ॥ हताश्च विघ्नकर्तारः ॥ शत्रवः पराभवं यान्तु ॥ शाम्यन्तु घोराणि शाम्यन्तु पापानि शाम्यन्त्वितयः ॥ शुभानि वर्द्धन्ताम् ॥ शिवा आपः सन्तु ॥ शिवा ऋतवः सन्तु ॥ शिवा ओषधयः सन्तु ॥ शिवा नद्यः सन्तु ॥ शिवा गिरयः सन्तु ॥ शिवा अतिथयः सन्तु ॥शिवा अग्नयः सन्तु॥ शिवाऽऽहुतयः सन्तु ॥ अहोरात्रे शिवे स्याताम् ॥ शुक्रांगारकबुधबृहस्पति शनैश्चर राहु केतु सोमसहित आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ॥ भगवान् नारायणः प्रीयताम् ॥ भगवान् पर्जन्यः प्रीयताम् ॥ भगवान् स्वामीमहासेनः

हताश्च ब्रह्म द्विषेत्यादीनां शाम्यन्त्वित्यंतानां पूर्वस्यां जलप्रक्षेपणोक्तः प्रयोगचूडामणौ ॥

हताश्च ब्रह्मद्विष अहींथी आरभी शाम्यन्तु त्यांना वाक्यो बोली आचमनीवती पूर्वमा पाणी नाखवुं ॥ तेमा हताश्चथी ते शाम्यन्तु पापानि त्यांना पाणोतु जळ नीचे नाखवु ॥

मीयताम् ॥ पुण्याह कालान्न वाचयिष्ये इति यजमानः ॥ वाच्यतामिति द्विजाः ॥दीयते यत्र दानानि पूजान्ते च द्विजातयः ॥ दृश्यते यत्र मांगल्यं तत्पुण्याहं सदाऽस्तु मे ॥ ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवंनित्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान् नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय ग्रहयज्ञाख्यस्य कर्मणः पुंण्याहं भवन्तो ब्रुवन्तु ॥ अस्तु पुण्याहं ॥ एवं वचनं प्रतिवचनं च त्रिवारं सर्वत्र पठेत् ॥ मृकण्डसूनुरायुर्यत् ध्रुवलोमशयोस्तथा ॥ आयुषा तेन संयुक्ता जीवन्तु शरदः

दोन भागवते॥पुण्याहादिभिरभ्यास मंत्रमध्योर्ध्वनिस्वनैः ॥ पुण्यं कल्याणमृद्धिश्च स्वस्ति श्रीयादि पंचकम् ॥प्रणवाद्यं निराचष्टे भवत्पूर्वं भवन्त्विति ॥ मत्युक्तविषये मेषात्रिवारं स्वस्तिरित्यतः ॥ उदात्तानुदात्तस्वारितश्चेति ॥ मंत्रोहीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो नतमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यन्येद्रशत्रुःस्वरतोऽपराधात् ॥ इति शिक्षायाम् ॥

सकुटुम्बी, अशीर्वादनी इच्छवाळो तथा महात्माओने नमवावाळो एवो जे हूं ते मारे अर्थे हे ब्राह्मणो ! तमो पुण्यकारी दिवस कहो, एम यजमाने त्रण वखत कह्याथी ब्राह्मणोए त्रण वखत पुण्यकारी दिवस थाओ तेम कहेवुं, ए प्रमाणे मारुं कल्याण थाओ, मारे घेर ऋद्धि वधो, मने स्वस्ति प्राप्त थाओ, तथा श्री प्राप्त थाओ एमदरेक वाक्यो यजमानना कह्यापछी ब्राह्मणोए त्रण वखत ह्रस्व दीर्घ अने प्लुत उच्चारथी ब्राह्मणोए अस्तु शब्द पूर्वक कहेवां. पुण्याहं भवन्तो ब्रुवन्तु ए प्रमाणे कल्याणं० मृद्धि० स्वस्ति० श्रीरस्तु० ए पांचे वखत यजमाने बोलवुं ॥

शतम् ॥ पृथिव्यामुधृता यान्तु यत्कल्याणं पुराकृतं ॥ ऋषिभिः सिद्धगंधर्वै स्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्रा-
ह्मणाः मह्यं० अस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ २ ॥ कल्याणं एवं पूर्ववत् त्रिः ॥ प्रजापतिर्लोकपालो
धाता ब्रह्मा ऽच देवराट्॥भगवाञ्छाश्वतो नित्यं स नो रक्षतु सर्वदा॥सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिःकृता॥
संपूर्णा पूर्णचन्द्रेण तामृद्धिं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं० अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ कर्म
ऋध्यताम् । एवं त्रिः ॥ ३ ॥ आयुष्मते स्वस्तिमते यजमानाय दाशुषे ॥ क्रियास्त्वाशिषः सन्तु ऋत्विग्भिर्वेद-
पारगैः॥स्वस्ति या चाविनाशाख्या पुण्यकल्याणवृद्धिदा॥ विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः॥भो ब्राह्मणा
मह्यं०अस्मै कर्मणे स्वस्ति भवन्तो ब्रुवन्तु॥आयुष्मते स्वस्ति।एवं त्रिः॥३॥समुद्रमथनाज्जाता जगदानंदकारिका।हरि-
प्रिया च मांगल्या श्रियं तां च ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं अस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु अस्तुश्रीः
तिलकं कृत्वा ॥स्वस्ति या चाविनाशाख्या धर्मकल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः॥
अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच सर्वः

परिपूर्णोऽस्तु ॥ अस्तुपरिपूर्णः ॥ **अथाभिषेकः** ॥ अभिषेके पत्नी वामतः॥ एकस्मिन्पात्रे वरुणोदकं गृही-
त्वा अविधुराश्चत्वारो ब्राह्मणाः दूर्वाऽग्रपल्लवैर्यजमानमभिषिंचेयुः ॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ आखंडलोऽग्निर्भ-
गवान्यमो वै वरुणस्तथा॥ २ ॥वरुणः पवनश्चैव धनाध्यक्षस्तथाशिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु
ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शांति स्तुष्टिः कांतिश्च मातरः॥४॥
एतास्त्वामभिषिंचंतु धर्मपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ५ ॥ग्रहास्त्वामभिषिंच-
न्तु राहुकेतुश्च तर्पिताः॥देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥६॥ऋषयो मुनयो गावो देवमातर एव च॥ देवपत्न्यो
द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च

१ सव्ये पत्नी त्रिगुरयाने पितॄणां पादपूजने ॥ रथस्यारोहणे चैव अभिषेके विसर्जने ॥

---

१ स्वस्ति वाचन थया पछी यजमाने तिलक करी पछी यजमान पत्नीने यजमाननी डाबी बाजुए बेसाडी स्वस्ति वाचनना कळशमांथी पाणी लई आंबाना पांदडावडे मंत्रो भणी चार ब्राह्मणोए दंपतीपर प्रोक्षण करवुं ॥ ए प्रमाणे अभिषेक थया पछी यजमाने पोताने स्थाने बेसी ब्राह्मणोने दक्षिणा आपवी ॥

रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥९॥सहस्राक्षं शतधारं च ऋषिभिः पावनं कृतं॥तेन त्वामभिषिंचामि पावमानं पुनन्तु ते ॥ १० ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥११॥यत्ते केशे च दौर्भाग्ये सीमंते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तु घ्नंतु भेषजम् ॥ १२ ॥ इत्यभिषेकः ॥ तत्र कुंडमंडपपक्षे आचार्यः ॥ अद्येत्यादि० मम संकल्पोक्तास्ये कर्मणि मंडपकुंडादीनां प्रोक्षणार्थं च रक्षार्थं दिग्रक्षणं पंचगव्यकरणं करिष्ये इतिसंकल्प्य ॥ पूर्ववत् दिग्रक्षणादि कृत्वा मंत्रैः प्रोक्षणं कुर्यात् ॥ अद्येत्यादि० करिष्यमाणकर्मनिमित्तं वर्धनी कलशस्थापनपूर्वकं पूजनं करिष्ये ॥ इति संकल्प्य ॥ कलशस्थापनमंत्रैः वर्धिन्योपरि पूर्णपात्रान्तं कृत्वा पूजयेत् ॥ वर्धिन्यै नमः ॥ गंधं० पुष्पं० धूपं० दीपं नैवेद्यं० एवं पंचोपचारान् कृत्वा ॥ वर्धिनीकलशं

* अर्थ—कुंड मंडप कर्या होयतो तेनुं रक्षण तथा प्रोक्षणमाटे दिग्रक्षण तथा पंचगव्य करणनो संकल्पकरी पत्र, ८ प्रमाणे करावनुं.

*प्रोक्षण विगेरेकर्या पछी वर्धिनीकलश स्थापनना मंत्रो पत्र २१ मा प्रमाणे करी पूजा प्रार्थना करी दम्पतीए कलशहाथमां लइ मंडपनी प्रदक्षिणा करी ब्राह्मणोए मंत्रभणता आवी पश्चिम द्वारनुं यथोक्त पूजनकरी मंडपप्रवेश करवो तथा इशान दिशामा चोखानुं "स्वामणुं" करी कलश मुकी नमस्कार पूर्वक प्रार्थना करवी.

मंत्रनिर्घोषसुवासिनीगतिवाद्यनिःस्वनैः मंगलसू-
गृहीत्वा ॥ यजमानो सपत्निकः सपरिवारः सालंकृतः
स्तानि पठन् ॥ मंडपे प्रदक्षिणीकृत्य ॥ पश्चिमद्वारे मंडपं प्रविशेत् ॥ मंडपे वेद्युपरि
ईशानभागे अक्षताष्टदलोपरि वर्धिनीं संस्थाप्य प्रार्थयेत् ॥ मृन्मयि त्वं महाभागा सदा तीर्थोदकान्विता ॥
वर्द्धनी त्वं जगन्माता भव त्वं कुलवर्द्धिनी ॥ तव तोयेन कलशान्पूजार्थं पूरयाम्यहम् ॥ इति श्रीजयानंदात्मज
मूलशंकरशर्मणा विरचितायां विवाहकौमुद्यां पुण्याहवाचनांतप्रयोगः ॥ ॥ अथ मंडपप्रवेशः ॥ ब्राह्मणैः
सह मङ्गलवाद्यघोषैश्च सह गोधूमगुडलवणदीपादिभिः सहितः ब्राह्मणपुरःसरः शुक्लमाल्यानुलेपनस्ता-
दुशपुत्रपौत्रादिसमेतः सुशकुनसूचिताभ्युदयः सपत्नीको यजमानो दुर्वाम्रपल्लवनालिकेरादियुतं जलपूर्णं कल-

अर्थ-हवे पछी मंडपप्रवेश करवो—सुवासिनी मंगलवाजित्र शांति पाठ भणता ब्राह्मणो तथा मंगल द्रव्यादि लइ कर्ता स्त्री पुरुष पुत्र पौत्रादिथे परिवृत्त थइ, जेमा दरोइ आंबाना पातरा नालीकेर मुकेलुं छे एवो जल पुरित कुंभ लइ मंडपनी प्रदक्षिणा करी मंडपना पश्चिमद्वार अगाडी उभा रहेवुं. पछी संकल्प करी उमरानी ठेकाणे कुंकुमनो यंत्र काढी तेना परिवृत्त रहेला देवताओनुं स्थापन तथा पंचोपचारे पूजन करवुं. पछी विप्रोने नाशकलारा मंत्रो भणी पोतानुं जमणुं अंग प्रथमथी अंदर स्पर्श करे एवी रीते प्रवेश करवो तथा पत्नीना हाथमां रहेलो कुंभ इशान्य दिशामां अक्षत मुकी मुकवो, एने मंडप प्रवेश कहेछे अथवा वास्तु करी नवा गृहमां प्रवेश करवो होय तो एवी रीतेज करी गृहमां प्रवेश करवो ॥

शं गृहीत्वा ॥ मंडपं प्रदक्षिणीकृत्य॥ पश्चिमद्वारे स्थित्वा द्वारशाखां पूजयेत् ॥ अद्येत्यादि० तिथौ मम सकले-
ष्टसिद्ध्यर्थं मंडपप्रवेशांगभूतं द्वारशाखाधिष्ठातृदेवतानां पूजनमहं करिष्ये ॥ तद्यथा ॥ देहल्यग्रतः कुंकुमादिना
त्रिकोणं तदुपरि वृत्तं तदुपरि चतुरस्रं मंडलं कृत्वा ॥ तत्र असुरान्तकचक्राय नमः॥ इति मंत्रेण प्रक्षालितं ताम्रा-
दिपात्रं स्थापयित्वा कृष्णाय नमः हृदयाय नमः इति जलं पूरयेत्॥तत्र गंगे च यमुने चैव गोदावरि सरस्वति॥नर्मदे
सिंधुकावेरी जलेऽस्मिन्सान्निधिं कुरु ॥ इति मंत्रेणांकुशमुद्रया तीर्थान्यावाह्य पुष्पाणि निक्षिपेत् ॥ असुरान्तकच-
क्राय नमः ॥ इति द्वारमभ्युक्ष्य ॥ हस्ते अक्षतान् गृहीत्वा ॥ ऊर्ध्वं द्वारश्रियै नमः॥द्वारपीठस्य मध्ये देहल्यां वास्तु-
पुरुषाय नमः ॥ दक्षिणशाखायां गंगायै नमः ॥ वामशाखाया यमुनायै नमः ॥ दक्षिणे शंखनिधये नमः ॥
वामे पद्मनिधये नमः ॥ द्वारस्य चतुष्कोणेषु आग्नेय्याद्युर्ध्वाधः क्रमे ॥ आग्नेय्यां गणपतये नमः ॥
नैर्ऋत्यां दुर्गायै नमः ॥ वायव्यां सरस्वत्यै नमः ॥ ऐशान्यां क्षेत्रपालाय नमः ॥ द्वारश्रिया-
द्यावाहितदेवेभ्यो नमः ॥ सक्षीरजलेन स्नानं समर्पयामि ॥ द्वारश्रियाद्या०गंधं० ॥ द्वारश्रियाद्या० पुष्पं० ॥
द्वारश्रियाद्या० धूपं०॥ द्वारश्रियाद्या० दीपं०॥ द्वारश्रियाद्या नैवेद्यं० ॥ द्वारश्रियाद्यावाहितदेवेभ्यो नमः सर्वोपचा-

इह तिष्ठ ब्रह्मणे नमः ब्रह्माणं आ० ॥ अधोमेखलायां कृष्णवर्णालंकृतायां ॥ गंगाधर महादेव वृषारूढ महेश्वर ॥ आगच्छ भगवन् रुद्र कुण्डेस्मिन्संनिधो भव॥रुद्र इहा गच्छ इह तिष्ठ ॥ रुद्राय नमः रुद्रमा० ॥३॥योन्यां ॥ सेवंते महतीं योनिं देवर्षिसिद्धमानवाः ॥ चतुरशीतिलक्षाणां पन्नगाद्याः सरीसृपाः ॥ १ ॥ मनोभवयुता देवी रतिसौख्यप्रदायिनी ॥ मोहयन्ति सुरान् सर्वान् जगद्धात्रि नमोऽस्तुते ॥ गौरीहागच्छ इह ति० गौर्यै० ॥ जीवनं सर्व जन्तूनां सुगादिस्थानमुत्तमम् ॥ उत्तमाङ्गस्रुचाधारं कण्ठमावाहयाम्यहम् ॥ कण्ठ इहागच्छ इह ति० कण्ठाय० ॥ पद्माकाराथवाकुण्डे सदृशाकृतिसंयुता ॥ आधारः सर्वकुण्डानां नाभिमावाहयाम्यहम् ॥ नाभिं इहागच्छ ॥ इह तिष्ठ ॥ नाभ्यै० ॥ नैर्ऋते ॥ अज्ञानतज्ज्ञानतो वापि दोषाः स्युः खननोद्भवाः ॥ नाशय

—द्रिद्रव्याणि स्रुवेण समिधो मूलतोद्र्ध्वांगुलं विहाय मध्यमानामिकांगुष्ठै र्जुहुयात् ॥ चरुं ग्रासंसमं पाणिनैव जुहुयात् ॥ आज्यं स्रुवेणैव ॥ स्रुवाभावे यज्ञीयवृक्षपर्णेन ॥ सिद्धांतशेखरे ॥ कर्षप्रमाणमाज्यं स्यात् मधु क्षीरं च तत्समं ॥ तण्डुलानां शुक्तिमात्रं पायसं प्रसृतिसमं ॥ कर्षमात्राणि ॥ भक्ष्याणि लाजामुष्टिमिता मताः ॥ अन्नं ग्रासंसमं ग्राह्यं शाकं ग्रासार्धमात्रकं ॥ मूलखण्डं त्रिभागं स्यात्कंदानामष्टमांसकः ॥ इक्षोः पर्वप्रमाणं स्यादंगुलद्वितयं लता ॥ प्रादेशमात्राः समिधो व्रीहीणामंजले समा ॥ तिलसक्तुकणादीनां मृगिमुद्राप्रमाणतः ॥ पत्रपुष्पफलादीनां प्रमाणमिष्यते ॥

अद्दितान् सर्वान् विश्वकर्मन्नमोऽस्तु ते॥विश्वकर्मन्निहागच्छ इह तिष्ठ विश्वकर्मणे० विश्वकर्माणमा० कुण्डनैर्ऋते ॥ आवाहयामि देवेशं वास्तुदेवं महाबलम् ॥ देवदेव गणाध्यक्ष पातालतलवासिनम् ॥ वास्तुपुरुष इहागच्छ इह तिष्ठ वास्तुपुरुषाय नमः वास्तुपुरुषमा० ॥ प्रतिष्ठा सर्वदेवानां० विष्ण्वाद्यावाहितदेवाः सुप्रतिष्ठिताः वरदा भवन्तु ॥ विष्ण्वाद्यावाहितदेवेभ्यो नमः गंधं स० । विष्ण्वाद्यावा० पुष्पं स० । विष्ण्वाद्या० धूपं० स० ।

—श्रीखंडकेशरकस्तूरी कुंकमागरुकर्दमाः ॥ हरिचन्द्राः समं प्रोक्ताः गुग्गुलोबदरीसमाः ॥ आहुतीनामिदं मानं कथितं वेदवादिभिः ॥ तिलभिर्दूर्वाभिरेकाहुतिः ॥ कुंडेषु विपन्नेणैकेति ॥ (१) भास्करे मूलधृतैः ईशानीमारभ्य भ्रामितैः प्रतीचिमारभ्य प्राग् संस्थनिः सार्तैः त्रिभिर्दर्भैः त्रिः परिसमुह्य ॥ १ ॥ गोमयेन उ० उल्लेखनं मार्गत त्रिरूर्ध्वरेपाकरणं याम्यतः उदक्संस्थामादेशपरिमिता ॥२॥ उद्धिखितपांशूना पृर्द ऊर्ध्वं प्रक्षिप्य ॥३ ॥ न्युब्जपाणिना ॥ सन्मुख प्रणयेदग्निं निर्धूमं कुंडमध्यमः ॥ साक्षतं वन्हिपात्रे च सुवासिन्यै समर्पयेत् ॥ ४ ॥

—जेटलो करवो. तेमज मूळोना त्रणभागकरी त्रिजेभाग आपवो. तेमज थदेनो आठमोभाग आपवो, सेरडीनो भाग एकवर्व जेटलो आपवो, लताओनो भाग बेभगुल जेटलो आपवो, समीदो एक प्रादेश जेटली करी आपवी तथा भात खोबोभरी आपवो तथा तल साथरो कण वीगेरे मृगीमुद्रावडे आपवा तथा फूल पत्र अने फळ एनी समान—

विष्ण्वाद्या० दीपं स० । विष्ण्वाद्यावाहित० नैवेद्यं स० । शेषोपचारा यथेच्छया कर्तव्याः ॥ यजमानः जलं गृहीत्वा अद्येत्यादि० तिथौ अमुकवासरे अस्मिन्कर्मणि ब्राह्मणद्वारा पंचभूसंस्कारपूर्वकअग्निप्रतिष्ठां करिष्ये ॥ आचार्यो जलं गृहीत्वा ॥ मम यजमानानुज्ञया पंचभूसंस्कारपूर्वकं अग्निप्रतिष्ठां करिष्ये ॥ तत्र त्रिभिर्दर्भैः परिसमुह्य॥परिसमुह्य॥परिसमुह्य ॥ गोमयेन उपलिप्य ॥ उपलिप्य॥उपलिप्य॥कुशमूलेन उल्लिख्य ॥ उल्लिख्य॥ उल्लिख्य ॥ अनामिकांगुष्ठेन उद्धृत्य ॥ उद्धृत्य उद्धृत्य ॥ उदकेन अभ्युक्ष्य ॥ अभ्युक्ष्य॥ अभ्युक्ष्य॥ कांस्येन वा शरावेण सुवासिन्यग्निमानयेत् ॥ आनीतमग्निं स्थंडिलस्याग्नेय्यां निधाय ॥ हुं फट् इति मन्त्रेण क्रव्यादांशं नैर्ऋत्यां दिशि परित्यज्य ॥ त्रिवारमग्निं स्थंडिलोपरि भ्रामयित्वा ॥ आत्माभिमुखं अग्निं संस्थाप्य ॥ अग्न्यानी-

(२) ॥ धर्मसिंधौ ॥ अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥ पावमानः पुंसवने सीमंते मंगलाभिधः ॥ प्रबलो जातसंस्कारे पार्थिवो

—आहुति आपवी, श्रीखंड, केशर, कस्तुरी, कुंकुम, अगर, कर्दमएटली वस्तुनो होम गणा भेळी लइने करवो. तथा, गुगळनो होम करवो ते बोरना जेटलो लेवो. तथा त्रण दुर्वानी एक आहुति थायछे तेमज श्रीभगवान् लई दर्भनो होम करवो ॥ (१) ब्राह्मणे संकल्प करवोके यजमाननी आज्ञाथी अग्निस्थापन करूंछउं दर्भे परिसमुह्य इत्यादि करी यजमानपत्नीने तांबाना वेपात्र, वा कांसाना वा माटोडाना पात्रमां साधीओ काढी नोरता नाखी अथवा ते थाळी नूतन जोईए भोजन करेली पण न जोईए तांबानु पात्र पण नाळीयेरोछे. तेणे घरमां जई एकपात्रमां देवता लइ बीजु पात्र उपरढांकी,

तत्पात्रे साक्षतोदकं निर्षिच्य ॥ अग्निमुखं कृत्वा ध्यायेत्॥सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः ॥ त्रिपात्प्रस-न्नवदनः सुखासीनः शुचिस्मितः ॥ १ ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ॥ बिभ्रद्दक्षिणहस्तैस्तु

नाम कर्मणि ॥ अन्नासने शुचिः प्रोक्तो सभ्यः स्याच्चौलकर्मणि ॥ व्रतादेशे समुद्भवो गोदानादौ सूर्यः ॥ विवाहे योजकः ॥ प्रायश्चित्ते विट् ॥ शांतिके वरदः पौष्टिके बलवर्धनः ॥ मृतदाहे क्रव्यादः ॥ पूर्णाहुत्यां मृडः ॥ कात्यायनः ॥ न नखेन न काष्ठेन नाश्मना मृन्मयेन वा ॥ प्रोक्षिखेल्लक्षणं विप्रसिद्धिकामस्तु यो भवेत् ॥ नखेन कुनखी चैव काष्ठेन व्याधिपीडति ॥ अश्मना धननाशः स्यात्कलहः मृन्मये न च ॥ फलेन फलमाप्नोति पुष्पेन श्रीयमिच्छति ॥ पर्णेन धनलाभः स्यात् दीर्घमायुःकुशेन तु ॥ तस्मात्फलेन पुष्पेण पर्णेनाथ कुशेन वा ॥ प्रोल्लि-खेल्लक्षणे विप्रसिद्धिकामस्तु सर्वेषु ॥ दर्भाः कृष्णाजिनं मंत्राः ब्राह्मणा हविरग्नयः ॥ अयातयामान्येतानि नियोज्यानि पुनःपुनः ॥ चितौ दर्भाः पथिदर्भाः ये दर्भाः यज्ञभूमिषु ॥ स्तरणासनपिंडेषु षट्कुशान् परिवर्जयेत् ॥ ब्रह्मयज्ञेषु ये दर्भाः ये दर्भा पितृतर्पणे ॥ हता मूत्र-पुरीषाभ्यां तेषां त्यागो विधीयते ॥ इति छंदोगपरिशिष्टे ॥

–कोई अपवित्रने स्पर्श न थतां पूजानी ठेकाणे आवी नीचे पात्र मूकवुं. केटलाक ब्राह्मणो ते यजमानपत्नीना हाथमांथी अग्नि पात्र लेछे, ते प्राय-श्चित्ति थायछे. माटे तेम न करतां नीचे मूकावी ते पात्र ब्राह्मणे लइ पोताना सन्मुख करी अग्निस्थंडिलमां (अथवा कुंडमां) मूकवो. पछी ते पात्रमां थोडुं चोखा तथा द्रव्य नाखी यजमानपत्नीने आपवुं.

शक्तिमत्रं स्रुवं स्रुवम् ॥ २ ॥ तोमरं व्यंजनं वामे घृतपात्रं च धारयन् ॥ आत्माभिमुखमासीन एवं रूपो हुताशनः ॥ ३ ॥ अग्ने वैश्वानर शांडिल्यगोत्र शांडिल्यासितदेवलेति त्रिः प्रवरान्वितभूमिर्माता वरुणः पिता मेशध्वज प्राङ्मुख मम संमुखो भव ॥ शान्तौ वरदनामाग्निं प्रतिष्ठाप्य ॥ अग्निपुरुषाय नमः इति मंत्रेण वायव्यकोणे पूजयेत् अग्नये नमः गंधं० पुष्पं० धूपं० दीपं० नैवेद्यं समर्पयामि ॥ अग्निं शक्त्या संपूज्य ॥ प्रार्थयेत् ॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम् ॥ हिरण्यवर्णमनलं समृद्धं विश्वतोमुखं ॥ प्रार्थनापूर्वकं नमस्कारं समर्पयामि ॥ **अथ ग्रहस्थापनम्** ॥ तत्र पूर्वं कुण्डमंडपे ग्रंथोक्तप्रकारेण ग्रहपीठं कृत्वा ॥ अथवा काष्ठमयपीठे श्वेतवस्त्रं प्रसार्य तदुपरि पंचवर्णैः वा शुभ्राक्षतैः नवग्रहमंडलानि कृत्वा ॥ तेषां लक्षणादीनि ॥ अथप्रयोगः ॥

॥ (१) स्कांदे ॥ जन्मभू गोत्रमग्निश्चवर्णस्थानमुखानिच ॥ यो ज्ञात्वाकुरुते शांतिं ग्रहास्तेनावमानिताः ॥ १ ॥ वर्तुलंमंडलमादित्ये चतुरस्रं निशाकरे ॥ महीपुत्रे त्रिकोणंतु बुधेवै बाणसंनिभम् ॥ २ ॥ गुरौतुपद्मिदाकारंपंचकोणं तु भार्गवे ॥ धनुषाकृतिमंदे च शूर्पाकारंतु राहवे ॥ ३ ॥

अर्थ-(१) अग्नि स्थापन थया पछी अग्निना मंत्रोथी आवाहन करी- "शांतिओमां" वरद नामना अग्निनुं पूजन करी प्रार्थना करवी (१) एवे नवग्रहोनुं स्थापनकरवुं तेमांप्रथमतो बाजठपर अथवा शास्त्रोक्त पीठपर सफेद ककडो पाथरी तेना उपर नवग्रहोना मंडलोकाढवा—तेनालक्षणनो पट

केतवे तु ध्वजाकारं मंडलानि प्रकल्पयेत् ॥ मध्येतु भास्करंविद्याच्छशिनं पूर्वदक्षिणे ॥ दक्षिणे लोहितं विद्याद् बुधंपूर्वोत्तरेऽपिच ॥ उत्तरेतु गुरुंविद्यात् भार्गवं पूर्वतो न्यसेत् ॥ शनिं पश्चिमतःस्थाप्य नैर्ऋते राहुमेवच ॥ केतुं वायव्यकोणे च ग्रहस्थानानि कल्पयेत् ॥ प्रतिष्ठा कल्पे ॥ शुक्रार्कौ प्राङ्मुखौज्ञेयौ गुरुसौम्यौ उदङ्मुखौ ॥ प्रत्यङ्मुखौ सोमशनी शेषा दक्षिणतोमुखाः ॥ एतान्युदङ्मुखान्केचिः स्वस्व लोकेनिवासिनः ॥ यजमानात्माभिमुखाः सर्वे संस्थापयंति च ॥ पूज्य पूजकयो र्मध्ये यत्र प्राचीं प्रकल्पयेत् ॥ तत्र संन्मुखसंस्थाप्या इति न्यायो यथा तथमिति ॥ मदनरत्नसंग्रहे ॥ ग्रहस्य दक्षिणेभागे स्थापयेदधिदेवताः ॥ ग्रहस्य वामपार्श्वे तु स्थाप्याः प्रत्यधिदेवताः ॥ ईश्वरं च उमां चैव स्कंदं विष्णुं तथैवच ॥ ब्रह्माण मिंद्रं तु यमं कालं चैव तु अष्टमं ॥ चित्रगुप्तं तु नवमं किर्तिता अधिदेवताः ॥ अग्नि श्चैव तथा आपः पृथिवी विष्णु रेव च ॥ इंद्रश्चैव तथेन्द्राणि प्रजापति स्तथैवच ॥ सर्पश्चैव तु ब्रह्मा च एताः प्रत्यधि देवताः ॥ राहुर्मंदद्दिनेशाला भृगारस्थो यथा क्रमं ॥ गणेश दुर्गा वायुश्च राहुकेत्वोश्चदक्षिणे ॥ आकाश मश्विनौदेवौ स्थापयित्वा क्रमेणतु ॥वास्तोष्पति क्षेत्रपालौ स्थाप्यौ गुर्वोत्तरेषु च ॥एताः सर्वैव संस्थाप्याः क्रमं सात्रुप्यदेवताः ॥ इंद्राग्नि यमनैर्ऋत्य वरुणो वायुरेव च ॥ कुबेरैशानाचिस्पष्टौ मगादि प्रदिशाधिपाः॥ ब्रह्माणं च ततस्थाप्य पूर्वेशान्यो स्तुपश्यमे ॥ प्रतीचि नैर्ऋतिमध्ये अनंतं स्थापयेदिति॥आवाहनं तु प्रतिमाक्षतपुंजादि स्थापितं संस्पृश्य कर्तव्यमितिभास्करे॥ संग्रहे ॥ तिलाज्य चरुधिद्रव्यं समिधां च यथाक्रमं॥ग्रहहीनां च सर्वेषां हविर्द्रव्य मुदीरितं ॥ अर्कः पलाश खदिरा अपामार्गोय पिप्पलः ॥ औदुंबरः शमी दूर्वा कुशाश्च समिधादिति ॥ हेमाद्रौ भविष्ये च ॥

–मुकेलोते ते प्रमाणेकरी अधिप्रत्यधि देवता विगेरे सहित ग्रहना सोपारी गोठववां ॥–जो शक्तिहोयतो दरेक ग्रहोनी मूर्तीओ कराववी तेनापर आवाहनकरी

हस्ते जलं गृहीत्वा ॥ अद्येत्यादि० ॥ अमुकवासरे संकल्पोक्तकर्मणः सांगतासिध्यर्थं आदित्यादिग्रहाणां सपरिवाराणां स्थापनप्रतिष्ठापूजनं करिष्ये ॥ हस्ते अक्षतान् गृहीत्वा ॥ उक्तमंडले अक्षतपुंजेषु पूगीफलानि निधाय देवानावाहयेत् ॥ हस्ते अक्षतान् गृहीत्वा ॥ सूर्यं ॥ कलिंगदेशेश्वर जपापुष्पोपमांगद्युते ॥ तेजोनिधे त्रिलोकप्रकाशक त्रिदेवतामयमूर्ते नमस्ते संनद्धो माणिक्याभरणभूषितारुण ध्वजपताकोपशोभितेन सप्ताश्वरथ-वाहनेनागच्छ पद्मकर्णिकायां ताम्रमयीं प्रतिमां प्राङ्मुखीं वर्तुलपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥ १ ॥ चंद्रं ॥ भगवन् सोमद्विजाधिपति सुधामयशरीरात्रिगोत्र यमुनादेशेश्वर गोक्षीरधवलांगकान्तेय द्विभुजगदा-वरदांकितकरशुक्लांबरमाल्यानुलेपन सर्वांगमुक्तमौक्तिकाभरण रमणीय समस्तलोकाप्यायिकदेवतास्वाप्यायि

स्थापन करवु. हवे ग्रहो केवाळे तेनुं वर्णन ध्यानमां लइ तो तेना स्थानपर मंत्र युक्त बेसाडवापअेहाथमांजळलइ संकल्पभणवो.तेमां सपरिवार ग्रहोनुं स्थापन करीश एमकेवाथी मधा आवेछे.— तेपर्कोअल चोखालइ सूर्यनु ध्यान करी वचमा तांबाना कल्शपर तरमाणीपरताबानीमूर्तीपर मंत्रो उपरप्रमाणे भणायापछी स्थापन करवुं एमसूर्यनुं वर्तुल पीठे वचमां स्थापन करी बीजाग्रहोनुं स्थापन जेतेनाठेकाणापर उपर प्रमाणे स्थापन करवुं जोदुरेक ग्रहोनीप्रतिमा ते ते न थायतो मूर्तियो सुवर्णनी करावबी. अथवा रुपानी करावबी; एमपण थायछे. एप्रमाणे ग्रहोनुं स्थापन विधीथी करावबुं.

नमस्ते सन्नद्ध श्वेतध्वजरथपताकोपशोभितेन दशश्वेताश्ववाहनेना गच्छात्र पद्माग्नेयदले स्फटिकप्रतिमां प्रत्यङ्मुखीं चतुरस्रपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥ २ ॥ भौमं ॥ भगवन् अंगारकाङ्गाकृते भारद्वाजगोत्रावंतिदेशेश्वर ज्वालापुंजोपमांगद्युते चतुर्भुज शक्तिशूलगदाखट्वांगधारिन् रक्ताम्बरमाल्यानुलेपन प्रवालाभरणभूषित सर्वांगदुरलोकदिसे नमस्ते ॥ सन्नद्ध रक्तध्वजपताकोपशोभितेन रक्तमेषरथवाहनेनागच्छ पद्मदक्षिणदले चंदनप्रतिमां दक्षिणमुखीं त्रिकोणपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥ ३ ॥ बुधं ॥ भगवन् सौम्य सौम्याकृते सर्वज्ञानभयात्रिगोत्र मगधदेशेश्वर कुंकुमवर्णांगद्युते चतुर्भुजखड्गखेटकगदांकित पीताम्बरमाल्यानुलेपन नीलरत्नाभरणालंकृत सर्वांग विबुधपते नमस्ते ॥ सन्नद्धपीतध्वजपताकोपशोभितेन चतुःसिंहरथवाहनेनागच्छ ॥ पद्मैशानदले सुवर्णप्रतिमाउदङ्मुखीं बाणाकारपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥ ४ ॥ गुरुं ॥ भगवन् बृहस्पते समस्तदेवताचार्यांगिरसगोत्र सिंधुदेशेश्वर दीर्घसुवर्णसदृशांगद्युते चतुर्भुजदंडकमंडलुअक्षसूत्रवरदांकितपीताम्बरमाल्यानुलेपन पुष्परागमयाभरणरमणीयसमस्तविद्याधिपते नमस्ते सन्नद्धपीतध्वजपताकोपशोभितेन पीताश्वरथवाहनेनागच्छ ॥ पद्मोत्तरदलमध्ये सुवर्णप्रतिमामुदङ्मुखीं दीर्घचतुरस्र पीठेऽधितिष्ठ ॥ पूजार्थं त्वा-

मावाह्वयामि ॥ ५ ॥ शुक्रं ॥ भगवन् भार्गव समस्तदैत्यगुरो भार्गवगोत्र भोजकटदेशेश्वर रक्तोज्ज्वलांगकांते
सर्वांगसमस्तनितिशास्त्र-
चतुर्भुज दंडकमंडल्वक्षसूत्रवरदांकित करशुक्लाम्बरमाल्यानुलेपन शुक्लाभरणभूपित
पुराणमते नमस्ते ॥ सन्नद्धशुक्रध्वजपताकोपशोभितेन शुक्लाश्वरथेनागच्छ पूर्वदलमध्ये रजतप्रतिमां प्राङ्मुखी
पंचकोणपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥ ६ ॥ शनैश्चरं ॥ भगवन् शनैश्चर भास्करतनय काश्यपगोत्र
सौराष्ट्रदेशेश्वर कज्जलाभकांते चतुर्भुजचापतुणीरकृपयाऽभयांकित करनीलाम्बरमालानुलेपन नीलरत्नभूपणालं-
कृत समस्तभुवनभिपणाभिमर्पमूर्ते नमस्ते ॥ सन्नद्धनीलध्वजपताकोपशोभितेन नीलगृध्र रथवाहनेनागच्छ ॥
पद्मपश्चिमदले लोहमयीं प्रतिमां प्रत्यंगधनुपाकारपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि ॥७॥ राहुं ॥ भगवन् राहो
रविसोममर्दन सिंहिकानंदन पैठिनसगोत्र वर्बरदेशेश्वर कालमेघद्युते व्याघ्रवदन चतुर्भुजखड्गचर्मशूलवरदांकित
कृष्णांबरमालानुलेपन गोमेदकाभरणभूपित सर्वांगशौर्यनिधे नमस्ते ॥ सन्नद्धकृष्णध्वजपताकोपशोभिते कृष्णसिंह-
रथवाहनेनागच्छ ॥ पद्मनैर्ऋतिदले सिसमयिप्रतिमां दक्षिणमुखीं शूर्पाकारपीठेऽधितिष्ठ ॥ पूजार्थं त्वामावाहयामि
॥ ८ ॥ केतुं ॥ भगवन् केतो कामरूप जैमिनिगोत्र मध्यदेशेश्वर धूम्रवर्ण ध्वजाकृते द्विभुजगदावरदानांकितकर-

चित्राम्बरमाल्यानुलेपन वैडुर्यमयाभरणभूषित सर्वांगचित्रशक्के नमस्ते ॥ सन्नद्धचित्रध्वजपताकोपशोभितेन चित्रकपोतरथवाहनेनागच्छ ॥ पद्मवायव्यदले कांस्यप्रतिमां दक्षिणाभिमुखीं ध्वजाकारपीठेऽधितिष्ठ ॥ पूजार्थे त्वामावाहयामि ॥ इति ग्रहाणां स्थापनं ॥ अथाधिदेवताः ॥ सूर्यस्य दक्षिणे शंभुं ॥ भगवंतं पंचवक्त्रं त्रिलोचनं वृषारूढं कपालशूलखट्वांगाधिधारिणं चंद्रमौलिं आदित्याधिदेवेशं शंभु मावाहयामि ॥१॥ चंद्रस्य दक्षिणे उमां ॥ भगवतीमक्षसूत्रदर्पणकमलकमंडलुधारिणीं नानाभरणभूषितां त्रिदशपूजितां सोमाधिदेवतासुमा मावाहयामि ॥२॥ भौमस्य दक्षिणे॥ स्कंदं॥भगवंतं षण्मुखं शिखंडकविभूषणं रक्ताम्बरधरं मयूरवाहनं कुक्कुटघंटापताकाशक्त्युपेतं चतुर्भुजं अंगारकाधिदेवं स्कंद मावाहयामि ॥ ३ ॥ बुधस्य दक्षिणे विष्णुं ॥ भगवंतं चतुर्भुजं कौस्तुभादिनानाभरणभूषितं पीताम्बरधरं कौमोदकीपद्मशंखचक्रोपेतं बुधादिदेवं विष्णुमा० ॥ ४ ॥ गुरोः दक्षिणे ब्रह्माणं ॥ भगवंतं ब्रह्माणं पद्मासनस्थं जटिलचतुर्मुखमक्षमालास्रुवं पुस्तककमंडलुधारिणं कृष्णाजिनवाससं

(१) नवग्रहोनुं स्थापन थया पछी अधिदेवताओनुं स्थापन ग्रहोना दक्षिणभागे करवुं. ते दरेकना कळश गोठवी तरभाणी मूकी ग्रहो प्रमाणे मूर्ति मूकी यथोक्त करवुं.

भुजां सिंहारूढां दुर्गाख्यदैत्यान् संहारिणीं दुर्गामावाहयामि ॥ २ ॥ सूर्यस्य उत्तरे वायुं ॥ श्यामवर्णं हेमदण्डधरं
कृष्णमृगवाहनं जगत्प्राणरूपं मोहिनीप्रियं वायु मावाहयामि ॥ ३ ॥ राहोर्दक्षिणे आकाशं ॥ भगवंतं चंद्रार्कोपेतं
द्विभुजं पण्द्माकाशमावाहयामि ॥ ४ ॥ केतो र्दक्षिणे अश्विनौ ॥ नीलोत्पलाभौ नीलांबरधारिणौ प्रत्येकमौपधि-
पुस्तकोपेतौ दक्षिणपार्श्वे परस्परवामपार्श्वे रत्नभांडाकरशुक्लांबरधारी नारीयुग्मोपेतौ देवभिषजावश्विनावावाह-
यामि ॥ इति लोकपालाः ॥"वास्तोष्पतिं" ॥ उत्तरे भगवंतं देवेशं महाबलं देवदेवं गणाध्यक्षं पातालतलवासिनं
वास्तुदेव मावाहयामि ॥ १ ॥ मंडलस्योत्तरे ॥ क्षेत्रपालं ॥ भगवंतं देवेशं दिव्यरूपं महाकायं नानाभरणभूषितं
संहारमूर्तिं शिरसि धृतजटाशेखरं चंद्रबिंबं कृतनरवपुषं करालं पापनाशं क्षेत्रपाल मावाहयामि ॥ **अथ दि-**
क्पालाः ॥ पूर्वं इंद्रं ॥ स्वर्णवर्णसहस्राक्षं वज्रपाणिं शचिप्रिय मिंद्रमावाहयामि ॥ १ ॥ आग्नेयां अग्निं ॥ सप्ताः

३६ (१) मंगलोत्तरे क्षेत्रपाल स्थापन मिति ॥ शांति कमलाकरे इति क्रतु साद्गुण्य देवताः ॥

अर्थ–हवे गणपत्यादि साद्गुण्यदेवताओनुं स्थापन करवुं ते राहु, शनि, अने सूर्य, तेनी उत्तरदिशामां करवुं. वास्तोष्पति अने क्षेत्रपालनुं स्थापन मंडलना उत्तरमां करवुं. (१) इन्द्रादिदशादिक्पालनुं स्थापन पूर्वादि दिशाओमां करवुं तेमां ब्रह्मानुं " पूर्वेशानमध्ये " तथा अनंतनुं पश्चिम निर्ऋतिमध्ये करवुं. आवाहन करवुं, ते दरेक ग्रहोनी मूर्तीओने स्पर्श करी करवुं.

र्चिपं सप्तहस्तं स्रुकस्रुवशक्ति सूत्रतोमरव्यंजनघृतपात्राणि दधानं स्वाहाप्रियं मेषवाहन ममि मावाहयामि ॥२॥ दक्षिणे यमं ॥ रक्तवर्णं दंडधरं महिषवाहनमभिप्रियं यममावाहयामि ॥ नैर्ऋत्यां निर्ऋतिं ॥ नीलवर्णं खड्ग चर्मधरमूर्ध्वकेशं नरवाहनं कालिकाप्रियं नैर्ऋति मावाहयामि ॥ ४ ॥ पश्चिमे वरुणं ॥ रक्तभूषणं नागपाशधरं मकरवाहनं पद्मिनीप्रियं वरुण मावाहयामि ॥ ५ ॥ वायव्यां वायुं ॥ श्यामवर्णं हेमदण्डधरं कृष्णमृगवाहनं जगत्प्राणिरूपं मोहिनीप्रियं वायु मावाहयामि ॥ ६ ॥ उत्तरे सोमं ॥ स्वर्णवर्णनिधीश्वरं गदापाणिमश्ववाहनं चित्रिणिप्रियं सोम मावाहयामि ॥ ७ ॥ ईशान्यां ईशानं ॥ शुद्धस्फटिकवरदाभय-शूलाक्षसूत्रधरं वृषभवाहनं गौरीप्रियं ईशान मावाहयामि ॥८॥ पूर्वेशानयोर्मध्ये ब्रह्माणं ॥ भगवंतं पद्मासनस्थं ज-टिलं चतुर्मुखं अक्षमालास्रुवपुस्तककमंडलुधारिणं कृष्णाजिनवाससं स्वराप्रियं ब्रह्माणमावाहयामि ॥ ९ ॥ निर्ऋति वरुणयोर्मध्ये ॥ अक्षसूत्रधरं कुंडलिकापुच्छयुक्तं सहस्रभोगं शुभ्रवर्णमनंत मावाहयामि ॥ १० ॥ ईशान्यां ॥ विधियुक्तमंत्रैः कलशोपरि रुद्रं ॥ भगवंतं गिरिजाप्रियं नंदीशं डमरु त्रिशूल खट्वांगाभयधारिणं

(१) इति क्रतुसंरक्षक देवताः ॥ अयं रुद्रकलशो यजमानस्य स्नानार्थ मिति कमलाकरैः ॥ रुद्रकलशोपरि हस्तं दत्वा सांगं रुद्रं जपेत् ॥

त्रिदशसेवितं रुद्र मावाहयामि ॥ ११ ॥ एवं ग्रहवेद्यां देवान्संस्थाप्य ॥ हस्ते अक्षतान् गृहीत्वा ॥ प्रतिष्ठा कार्या ॥ प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता ॥ प्रतिष्ठां वः करोम्यत्र मंडले दैवतैः सह ॥ आदित्याद्यावाहितदेवाः सुप्रतिष्ठिताः वरदाः भवत ॥ प्रतिष्ठांते पूजनं ॥ आदित्याद्यावाहितदेवेभ्योनमः ॥ आसनं समर्पयामि ॥ २ ॥ एवं सर्वत्र ॥ आदित्याद्यावाहितदेवेभ्योनमः ॥ पादयोः पाद्यं समर्पयामि ॥ ३ ॥

(१) कलशस्थापनोक्तमंत्रैः कलशस्थापनं ॥ तेषामुपरि कृताग्न्युच्चारणपूर्विकां सूर्यादीनां प्रतिमाः स्थापयेयुः ॥ पूजनन्तु अष्टादशोपचारैः कर्तव्यं ॥ आवाहनासनं पाद्य मर्घ माचमनीयकं स्नानं वस्त्रोपवीतं च गंधमाल्यान्यनुक्रमात् ॥ धूपं दीपं च नैवेद्यं तांबूलं च प्रदक्षिणां ॥ पुष्पांजलि रितिप्रोक्ता उपचारास्तु षोडश इति ॥

अर्थ-(१) रुद्रकलशनुं स्थापन ग्रहना ईशानमां करवुं तेमां कलशमां जल विगेरे यथोक्त भरी ईशानमां मुकवो तेनापर रुद्रनुं स्थापन करवुं. ग्रहोनी साथे पूजा करी तेना पर हाथ अडकाडी एक ब्राह्मणपासे रुद्र जप कराववो. उपर लख्याप्रमाणे ग्रहोनुं स्थापन थया पछी चोखालई प्रतिष्ठानो मंत्रभणी दरेकना उपर वधाववा तथा पूजा करवी तेमां एक पूजापण नियमित उपचार वडे थती नथी तेथी योग्यफळ मळतुं नथी माटे षोडशोपचार अथवा अष्टादशोपचार, षट्त्रिंशोपचार, चतुष्षट्त्रिंशोपचार, राजोपचार विगेरे घणाउपचारो छे. तेमांथी जे ते उपचार ग्रहण करीने पूजा करवी ए योग्य छे. माटे एक निश्चय करी पूजा करवी. केटलाक उपचारोमां दक्षणा नथी ते त्यां मूकवी नहि पण पूजनना अन्ते मूकवी. कारणके दक्षिणा सफलार्थ छे मध्यमां मूकवाथी विधि नष्ट थायछे

आदित्या० अर्घ्यं स० ॥ ४ ॥ आदित्या० आचमनीयं स० ॥ आदित्या० स्नानं स० ॥ ६ ॥ आदित्या० वस्त्रं स० ॥ १ ॥ आदित्या० यज्ञोपवीतं स० ॥ ८ ॥ आदित्या० आभूषणानि स० ॥ ९ ॥ आदित्या० गंधं स० ॥ १० ॥ आदित्याद्यावाहितदेवेभ्यो० अलंकारार्थेअक्षतान्स० ॥ आदित्या० पुष्पाणि स० ॥ ११ ॥ आदित्या० सुशोभनार्थे सौभाग्यद्रव्याणि स० ॥ आदित्या० धूपं स० ॥ ११ ॥ आदित्या० दीपं स० ॥ १२ ॥ आदित्या० नैवेद्यं स० ॥ १३ ॥ आदित्याद्या० तांबूलं स० ॥ १४ ॥ आदित्या० अनुलेपनं स० ॥ १५ ॥ आदित्या० नमस्कारं स० ॥ १६ ॥ आदित्याद्या० साद्गुण्यार्थे दक्षिणां समर्पयामि ॥ प्रार्थनापूर्वकनमस्कारं कुर्यात् ॥ जपाकुसुमसंकाशं काश्यपेयं महद्द्युतिं ॥ तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरं ॥ १ ॥ दधिशंखतुशाराभं क्षीरो-

(१) चंदनेन मुखनासिके लिंपेतीति गदाधरः ॥ सर्वशरीरोद्वर्तनं कार्य मिति हरिहरः ॥ (२) अन्वाधानं ॥ प्रयोगरत्ने स्मार्तोल्लास स्मार्तगंगाधर्यादिभिः उक्तः ॥ प्रचुरतरशिष्टाचार मासस्वाचात्राप्युच्यते ॥ फलं गृहीत्वा अस्मिन्गृहयज्ञाख्ये कर्मणि देवतापरिग्रहणार्थमन्वाधानं करिष्ये ॥ अस्मिन्नन्वाहिते ऽग्नौ पूर्वेण ब्रह्मणोगमनं ॥ उत्तरतः पात्रासादनं ॥ द्वे पवित्रे कांस्यमयी ताम्रमयी वा आज्यस्थाली ॥ ताम्रमयी चरूस्थाली पालाश्यः समिधः ॥ प्राच्यां वा धारौ समिद्धतमे आज्यभागौ पूर्णपात्रं ॥ दक्षिणा

॥ धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् ॥
दार्णवसंभवं ॥ नमामि शशिनं सोमं शंभोर्मुकुटभूषणं ॥ २ ॥ धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् ॥ सौम्यं सौम्यगुणो-
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहं ॥ ३ ॥ प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधं ॥ सौम्यं सौम्यगुणो-
पेतं तं बुधं प्रणमाम्यहं ॥ ४ ॥ देवानां च ऋषीणां च गुरुकांचनसन्निभम् ॥ बुद्धिभूतं त्रिलोकेशं तं नमामि
बृहस्पतिं ॥ ५ ॥ हेमकुंद मृणालाभं दैत्यानां परमं गुरुम् ॥ सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहं ॥ ६ ॥ नीलां-
जनसमाभासं रविपुत्रं यमाग्रजं ॥ छायामार्तंडसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥ अर्धकायं महावीर्यं चंद्रादित्य-
विमर्दनम् ॥ सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहं ॥ ८ ॥ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ॥ रौद्रं

–धा ॥ एतान्नैकल्पिका न्वदाधानहं करिष्ये ॥ अथ देवताभिध्यानं ॥ तत्र प्रजापति मिन्द्रमग्निं सोममेताः आज्येन प्रत्येक मेकैकया हुत्वा ॥ अत्र
प्रधानं ॥ आदित्यादि नवग्रहा नर्कादि यथालाभ सांमिधचरुतिलाज्यद्रव्यैः प्रत्येकं प्रतिद्रव्येण अष्टाष्टसंख्याकाभिराहुतिभिः ॥ अधिदेवता
प्रत्यधिदेवताश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्येण चतु श्चतुः संख्याकाभिराहुतिभिः विनायकादि पंचदेवताः वास्तोष्पतिं क्षेत्रपालं इंद्रादिदशदि-
कपालांश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्येण द्वाभ्यां द्वाभ्या माहुतिभ्यां यक्ष्ये ॥ न्यूनातिरिक्तार्थं घृताक्ततिलद्रव्येण समस्त व्याहृतिभि रष्टाविंशति
संख्याकाभि राहुतिभि र्यक्ष्ये ॥ शेषेण स्विष्टकृत् ॥ अग्निं वायुं सूर्यं मग्निवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्का
न्वरुणमादित्य मदितिं प्रजापतिमेता अंगप्रधानार्थं देवता आज्येन अस्मिन् ग्रहयज्ञाख्ये कर्मण्यहं यक्ष्ये ॥ इति अन्वाधानं ॥

रौद्रात्मकं घोरं तं केतुं प्रमाणम्यहं ॥ ९ ॥ आदित्या० प्रार्थनापूर्वक नमस्कारं स० ॥ अनया पूजया आदित्यादि ग्रहमंडलदेवाः प्रीयंता ॥ **अथ कुश्कंडिका** ॥ दक्षिणतो ब्रह्मासनं ॥ उत्तरतः प्रणीतासनं ॥ तत्र ब्रह्मोपवेशनं यावत्कर्म समाप्यते ॥ तावत्त्वं ब्रह्मा भव ॥ ब्रह्मानुज्ञातः उत्तरे प्रणीता प्रणयनं ॥ वामकरेण प्रणीतां संगृह्य ॥ दक्षिणकरेण जलं प्रपूर्य ॥ भूमौ निधाय ॥ आलभ्य उत्तरतोऽग्नेः स्थापनम् ॥ बर्हिप्रदक्षिणमग्नेः परिस्तरणं ॥ वा त्रिभि स्त्रिभि र्दर्भैः परिस्तरणं ॥ तच्च प्रागुदगग्रैः ॥ दक्षिणतो प्रागग्रैः ॥ प्रत्यगुदगग्रैः ॥ उत्तरतः

(१) ब्राह्मणाभावे कर्तैव छत्र मुत्तरीय जलपात्र दर्भवटुं ब्रह्मासने निधाय ॥ इति शांतिचिंतामणौ ॥ (२) प्रणिता उत्तरेस्थाप्या वितस्त्यन्तरतोग्नितः ॥ इति ग्रहयज्ञकल्पवल्याम् ॥ आसादनन्तु पात्राणां प्रादेशान्तरके बुधः ॥ इति कारिकाकारः ॥ प्रादेशमात्रे विज्ञेयं पवित्रे पत्रकुजचित् ॥ अनंतगर्भिणं साग्रं कौशं द्विदलमेव च ॥ आज्यस्थाली कांस्यमयी यद्वा ताम्रमयी तथा ॥ प्रादेश मात्रा दीर्घा सा गृहीतव्याऽप्रणाशुभा ॥ दशा प्रादेश मात्र्युर्ध्वमियं नास्ति बृहन्मुखी ॥ मृन्मय्यौदुंबरीवापी चरुस्थाली प्रशस्यते ॥ खादिरादेः स्रुवः कार्यो हस्त मात्रप्रमाणतः ॥ अंगुष्ठ पर्वखातं तनु त्रिभागं दीर्घे पुष्करम् ॥ अत्रोक्त पुरुषाहार परिमितान्नादिना पूर्णं पूर्णपात्रमिति कृत्यचिंतामणौ ॥

अर्थ-(१) आदित्यादि नवग्रहोनुं तथा अधिप्रत्यधिदेवता विगेरेनुं पूजन थया पछी संकल्प करी, करेलुं पूजन अर्पण करी, कुशांडीनो आरंभ करवो तेमां ब्रह्मासनथी आरंभी पात्रासादन लगी परीपूर्ण करवुं ॥

प्रागग्रैः अर्थवत् पात्रासादनं ॥ पवित्रछेदने दर्भास्त्रयः ॥ पवित्रे द्वे ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली
संमार्गकुशाः पंच ॥ उपयमनकुशाः सप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ स्रुची ॥ आज्यं ॥ तण्डुलाः ॥ पूर्णपात्रं॥
वरोवा॥ पवित्रछेदनैः॥ पवित्रीकरणं ॥ द्वयोः पवित्रयोरुपरिपवित्रत्रयं निधाय॥ द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य ॥
त्रयाणां मूलाग्राणि एकीकृत्य ॥ अनामिकांगुष्ठेन द्वयोरग्रं छेदयेत् ॥ द्विग्राह्य ॥ त्रिणि उत्तरतः क्षिपेत् ॥ प्रोक्षणीपात्रे
प्रणितोदक मासिंच्य ॥ पात्रांतरेण चतुर्वारं ॥ जलं प्रपूर्य वामकरे पवित्राग्रं दक्षिणेपवित्रयोर्मूलं धृत्वा मध्यतः
पवित्राभ्या मुत्पवनं प्रोक्षणीपात्रजलस्य प्रोक्षणीनां सव्यहस्तेकरणं ॥ दक्षिणहस्तमुत्तानं कृत्वा ॥ मध्यमाना-
मिकांगुल्योः मध्यपर्वाभ्या मपां उद्गिमनं ॥ प्रणितोदकेन प्रोक्षणीनां प्रोक्षणं ॥ आज्यस्थाल्याः प्रोक्षणं ॥ चरुस्था-
ल्याःप्रोक्षणं॥ संमार्गकुशानां प्रोक्षणं उपयमनकुशानां प्रोक्षणं॥समिधां प्रोक्षणं॥स्रुवस्य प्रोक्षणं॥स्रुचः प्रोक्षणं॥ आज्य-
स्य प्रोक्षणं ॥ तण्डुलानां प्रोक्षणं॥ पूर्णपात्रस्य प्रोक्षणं ॥ प्रणिताग्नयोर्मध्ये असंचरे प्रोक्षणीनां निधानं ॥ आज्यस्थाल्यां

अर्थ—(१) बधापात्रोनुं स्थापन थया पछी प्रोक्षणी पात्रने डाबा हाथमां लइ जमणा हाथवडे गोठवेला पात्रोनुं अनुक्रमे प्रोक्षण करवुं, पछी आज्यस्थालीमां
घी नाखी चरुस्थालीमां चोखानासी प्रणवसत पाणीथी धोइनाखी अग्निपर दक्षिण तरफ घीनुं पात्र मुकवुं तथा अग्निना मध्यभागमां चरु स्थालीमूकवी.

आज्यनिर्वापः चरुस्थाल्यां तण्डुलप्रक्षेपः॥ तस्य त्रिःप्रक्षालनं॥ चरुपात्रे प्रणीतोदक मार्पिच्य॥ दक्षिणतः आज्याधिश्रयणं ॥ मध्ये चरोरधिश्रयणं॥ ज्वलितोल्मुकेन पर्यग्निकरणं॥ अर्धश्रिते चरोः स्रुवस्य प्रतपनं॥ संमार्गकुशैः स्रुवस्य संमार्जनं ॥ अग्रैरग्रं ॥ मूलैर्मूलं ॥ प्रणीतोदकेनाभ्युक्षणं ॥ पुनःप्रतपनं ॥ देशे निधानं ॥ आज्योद्वासनं ॥ चरोरुद्वासनं ॥ वामकरे पवित्राग्रं दक्षिणे पवित्रयो मूलंधृत्वा ॥ मध्यतः पवित्राभ्यां ॥ आज्योत्पवनं ॥ आज्यावेक्षणं ॥ अपद्रव्यनिरसनं ॥ प्रोक्षिण्याः प्रत्युत्पवनं ॥ उपयमनकुशानादाय ॥ तिष्ठत् समिधोभ्याधाय ॥ प्रोक्षे-

(१) दैवेत्रिःक्षालितास्तेपा पितरि तण्डुलाः सकृत् ॥ इति कात्यायनस्य ॥ अनतिशिथिलं अकठिनं अदग्धं कौशल्येन स्रपयेत् ॥ इति कल्पचिंतामणौ ॥ (२) होत्र सूत्रे ॥ भूरादि नवस्विष्ट कृते चाघचतुष्टये ॥ अन्वारंभोभवे चेषु सोन्वारंभः कुशेनवै ॥ अग्रेघृतार्थनाशाय मध्ये पैत्र्यमृतप्रजाः ॥ मूले च म्रियते होता स्रुवस्थानं कथं भवेत् ॥ अग्र मध्याचयन्मध्यमूल्मध्याच मध्यतः ॥ स्रुवं धारयते विद्वान् शास्त्रर्थंच सद्गुधैः ॥ तर्जनीं च बहिः कृत्वा कनिष्ठां च बहिस्तथा ॥ मध्यमा नामिकांगुष्ठैः स्रुवं धारयते द्विजः॥ स्रुवहोमे सदात्यागः प्रोक्षणी पात्रमध्यतः पाणीहोमे त्यागो न ॥ अधोमुखऊर्ध्वपादः प्राङ्मुखोहव्यवाहनः ॥ तिष्ठत्येवस्वभावेन आहुतिः कुत्र दीयते ॥ सपवित्राम्बुहस्तेन कुर्यात् कुर्यादग्निदक्षिणाम् ॥ हव्यवाद् सलिलं दृष्ट्वा बिभेति संमुखोभवेत् ॥ इति कारिकायां ॥

अर्थ-(१) घृत तथा चरु थयो ओइने उतारवा पछी स्रुवाने तपावी प्रोक्षणकरी उपयमन कुशाल्ह समिधो आपवी, तथा पर्युक्षण करी जमणो पग उंचो पाडी नहाथी आरंभी स्रुवावती होम करवो ॥ स्रुवो मृगी मुद्राये शास्त्रे वीनो होम करवो.

ग्युदकशेषेण सपवित्रहस्तेन अग्नेः ईशानकोणादारभ्य ॥ प्रदक्षिणवत् पर्युक्षणं ॥ पवित्रयोः प्रणीतासु निधानं ॥
दक्षिणं जान्वाच्य जुहोति ॥ तत्राघारावाज्य भागौच ॥ ब्रह्मान्वारब्ध ॥ स्रुवेण जुहुयात् ॥ मृगिमुद्रया घृत-
स्रुवेण आज्यमादाय ॥ प्रजापतिं मनसा ध्यात्वा ॥ ह्रीं प्रजापतये नमः ॥ इदं प्रजापतयेनम ॥ इत्यग्ने रुत्तरभागे ह्रीं
इन्द्राय नमः॥ इदमिन्द्राय नमम ॥ दक्षिण भागे ॥ ह्रीं अग्नये नमः ॥ इदमग्नये नमम ॥ मध्ये ॥ ह्रीं सोमाय नमः॥
इदं सोमायनम हस्ते अक्षतान् ग्रहीत्वा॥शान्तीके वरदनामानमग्नि मावाहयामि॥अग्निं प्रज्वलितं वंदे जातवेदं हुता-
शनं ॥ सुवर्णवर्ण ममलं समिद्धं विश्वतोमुखं ॥ वरदनाम्नाग्नये नमः गंधं पुष्पं धूपं दीपं नैवेद्यं समर्पयामि ॥ अनया
पूजया अग्निः प्रीयतां ॥ यजमानेन द्रव्यत्यागः कार्यः ॥ यथाकालं प्रत्याहूति त्यागस्य कर्तुमशक्यत्वात्सर्वमेव
हविर्जातं देवताश्च मनसा ध्यात्वा ॥ इदं संपादितं । समिच्चरुतिलाज्यादिहविर्द्रव्यं या या यक्ष्माणदेवता तस्यै

मध्येपि गंधपुष्पादीन् दद्यादग्ने र्नसंशयः ॥ यत्तिर्नैवेद्य याश्चन्तु दातव्यं मितिनिश्चयः ॥ इति शांति मयूखे ॥

(१ कुशकंडिका भाष्यकारादयः ॥ अग्नि पूजा यदिः प्रोक्तेति वचनाद्वहिरेव सर्वपूजन मितिकेचिदाहुः ॥ तत्रविष्णुधर्मोत्तरे ॥

अर्थ– (१.) होममां पहेला प्रजापति आदिनी चारे आहुती आपवी, पछी वरदाग्निनुं स्थापन करी पूजन करी अग्निनुं ध्यान करवुं तथा करेली पूजा

तस्यै देवतायै नमम ॥ यथा दैवतमस्तु ॥ ततोहोमं कुर्यात् ॥ ह्रीं गणपतयेनमः इदं गणपतये नमम॥१॥ सूर्याय नमः इदं सूर्याय नमम ॥ ८ ॥ १ ॥ सर्वत्र त्यागमंत्रेणैव होमः कार्यः ॥ चन्द्रमसे नमः ॥ ८ ॥ २ ॥

(१) गणाधिपतये देयाः प्रथमा तु वराहुतिः ॥ अन्यथा विफलं विप्र भवतीह न संशयः ॥ इति कमलाकरे ॥ तिलाज्य चरुपक्वं च हवि र्मुख्यं प्रकीर्तित मिति ॥ ततो आदित्यादि नवग्रहाः क्रमेण पूर्वोक्त ग्रहहोमद्रव्येण अधिप्रत्यधिदेवताचतुश्चतुः संख्यया हुत्वा ॥ यस्य ग्रहस्य यासमित्सा तस्याधिदेवतायाः प्रत्यधिदेवतायाश्च योज्या ॥ विनायकादि दिक्पालान्ताकतु साद्गुण्यं क्रतुसंरक्षण देवताः पलाशो दुंबरान्यतम समि चरु तिलाज्य द्रव्येण द्वि द्वि संख्यया जुहोति ॥ समिस्सरला सत्वचा कनिष्ठिकाग्रवत् स्थूला द्वादशांगुलदीर्घा ग्राह्या ॥ अत्र त्रिशभि र्दूर्वा-भिरेकाहुतिः ॥ सर्वैव त्रिपत्रकुशै रेकाहुतिः ॥ द्रवद्रव्य स्रुवेणैव पाणिना कठिनं हविः ॥ प्रधानं पायसं प्रोक्तं सघृतं च सशर्करं ॥ अष्टोत्तरं शतं चैव जुहुया च्चिल्लसर्पिषा ॥ समिदाज्यं चरुं चैव तिलहोम स्ततः परं ॥ क्रमेण जुहुया देव मंत्रै रेभिःपृथक् पृथक् ॥ समिदर्कमयी सूर्ये पाला-श शशिनस्तथा ॥ खादीरि भूमिपुत्राय अपामार्गी बुधस्य च ॥ गुरोरश्वथ्थजा प्रोक्ता शुक्रस्यौदुंबरी शुभा ॥ शमी शनैश्चरे राहो दूर्वा केतो-श्च दर्भजा ॥ अष्टोत्तरन्तु साहस्रं शतमष्टाधिकंतथा ॥ अष्टाविंशति रष्टो वा यजेत् पंचामृत प्लुताः ॥ इति भास्करादौ ॥ आचारात्, ग्रासेषु पूग-नारिंगं जंबीरं बीजपूरकं ॥ उच्यति नालिकेरन्तु दाडिमं सर्वतः फलं॥ गुग्गुलस्य ततोहोमं सर्षपं तदनंतरं ॥ होमान्ते यजमानेन कर्तव्यं ग्रहपूजनं

अर्थ-(१) अग्नि पूजन थया पछी बधी आहुती थवते त्याग न थइ शके तेटला माटे हाथमां जळ तथा फळ लइ उपरनो त्याग संकल्प करवो, तथा होममां पेहेला गणपतिने १ एक आहुती आपीने स्थापित देवोने आहुति आपी तृप्त करवा, तथा स्थापित देवोने समीदोनो होम करवो तेमां सूर्यने आंकडानी चंद्रने खाखरानी, मंगळने खेरनी, बुधने आंघेडानी, गुरुने पीपळानी, शुक्रने उमरडानी, शनीने समडीनी, राहुने दुर्वा, केतुने दर्भ, एप्रमाणे नवेग्रहोनी समीधो

॥ ८ ॥ ५ ॥ शुक्राय नमः ॥ ८ ॥ ६ ॥ बृहस्पतये नमः ॥ ८ ॥ ४ ॥ बुधाय नमः ॥ ८ ॥ ३ ॥ भौमाय नमः ॥ ८ ॥ ९ ॥ अथाधिदेवताः ॥ शंभवे केतवेनमः ॥ ८ ॥ ८ ॥ राहवे नमः ॥ ८ ॥ ७ ॥ शनैश्चराय नमः ॥ ४ ॥ ४ ॥ ब्रह्मणे विष्णवे नमः ॥ ४ ॥ ३ ॥ स्कंदाय नमः ॥ ४ ॥ २ ॥ उमायै नमः ४ ॥ १ ॥ नमः ४ ॥ ८ ॥ चित्रगु. कालाय नमः ॥ ४ ॥ ७ ॥ यमाय नमः ॥ ४ ॥ ६ ॥ इन्द्राय नमः ॥ ४ ॥ ५ ॥ नमः ॥ ४ ॥ २ ॥ धरायै अद्भ्यो नमः ॥ ४ ॥ १ ॥ अग्नये नमः ॥ ४ ॥ ९ ॥ अथप्रत्यधिदेवताः ॥ भाय नमः ॥ ४ ॥६॥ प्रजाप- इन्द्राण्यै नमः ॥ ४ ॥ ५ ॥ इन्द्राय नमः ॥ ४ ॥ ४ ॥ नारायणाय नमः ॥ ४ ॥ ३ ॥ नमः ॥ ४ ॥ ९ ॥ अथगणपत्यादिदेवताः ॥ ब्रह्मणे नमः ॥ ४ ॥ ८ ॥ सर्पेभ्यो नमः ॥ ४ ॥ ७ ॥ तये नमः

—होमवी. तेमज जे देवता अधीदेवता प्रत्यधि देवता जेछे, तेनी पण तेज समीधमाणवी. ग्रहोनीसमीद् आपवानो ८ नो क्रम लीधोहोयतो तेना अधि देवता प्रत्यधि देवताओने ४ समीध आपवी. तेम क्रतु साद्गुण्य देवताओने समीदो २ आपवी. जेटलुं द्रव्यछे तेटलानो तुवाथी होम करवो तथा कठिण हविनेछे तेनो हाथेथी होम करवो. होम सघळो समाप्त थाय पछी गुगळनो होम करी सरसवनो होम करी डाबोपग भांयपर श्रण पसल ठोकी काने पाणी अरकाडी. लक्ष्मीहोम करवो, तेमां लक्ष्मीनुं पूजन करी मंत्रो श्रवण करता लक्ष्मी होम संपूर्ण करवो, पछी संकल्पकरी ओछुं वधारे थयुं होय तेने माटे प्रायश्चीत्त होमकरवो. ते आहुति २८ अथवा १०८ आपी करवी ॥

गणपतये नमः ॥ २ ॥ १ ॥ दुर्गायै नमः ॥ २ ॥ २ ॥ वायवेनमः ॥ २ ॥ ३ ॥ आकाशाय नमः ॥ २ ॥ ४ ॥ अश्विभ्यां नमः ॥ २ ॥ ५ ॥ इति पंच देवताः ॥ वास्तोष्पतये नमः ॥ २ ॥१॥ क्षेत्राधिपतये नमः ॥ २ ॥ २ ॥ ॥ **अथलोकपालाः** ॥ इन्द्राय नमः ॥ २ ॥ १ ॥ अग्नये नमः ॥ २ ॥ २ ॥ यमाय नमः ॥ २ ॥ ३ ॥ निर्ऋतये नमः ॥ २ ॥ ४ ॥ वरुणाय नमः ॥ २ ॥ ५ ॥ वायवे नमः ॥ २ ॥ ६ ॥ सोमाय नमः ॥ २ ॥ ७ ॥ ईशानाय नमः ॥ २ ॥ ८ ॥ ब्रह्मणे नमः ॥ २ ॥ ९ ॥ अनंताय नमः ॥ २ ॥ १०॥ महारुद्राय नमः ॥२॥११॥ एतादेवान्समिदाज्यं चरुतिलादिद्रव्यैः पृथक् पृथक् होमकार्यः ॥ विशेषहोमः ॥ द्राक्षाः सूर्याय नमः ॥ १ ॥ इक्षु चन्द्रमसे नमः ॥ २ ॥ पूगीफलं भौमाय नमः ॥ ३ ॥ नारिंगं बुधाय नमः ॥ ४ ॥ जम्बीरं बृहस्पतये नमः ॥ ५ ॥ बीजपूरकं शुक्राय नमः ॥ ६ ॥ उत्तर्तिं शनिश्चराय नमः ॥ ७ ॥ नालिकेरं राहवे नमः ॥ ८ ॥ दाडिमं केतवे नमः ॥ ९ ॥ गुग्गुलं रुद्राय नमः ॥ अथ सर्षपहोमः ॥ सर्वाबाधा प्रशमनं त्रैलोक्यस्याखिलेश्वरी ॥ एव मेव त्वयाकार्य मस्मद्वैरि विनाशनं ॥ इति सर्षपहोमः ॥ वामपादभूमौ त्रिस्ताडनं ॥ उदकं स्पृशेत् ॥ **लक्ष्मी-**

अंचारात् लक्ष्मीहोमः ॥ लक्ष्म्यास्तुदर्शनं पुण्यं दर्शनादभिवंदनं ॥ वंदनात् स्पर्शनं श्रेष्ठं स्पर्शना दपिपूजनं ॥ पूजनात् होमश्रेष्ठः ॥

होमः ॥ पय शर्करा घृत कदली फलाक्षतान् एकस्मिन्पात्रे एकीकृत्य ॥ लक्ष्म्याःमन्त्रैः लक्ष्मीहोमं कुर्यात् ॥ हस्ते जलं गृहीत्वा ॥ अद्येत्यादि०॥ अमुकवासरे मम गृहे अलक्ष्मीविध्वस्तये दशविधलक्ष्मीप्राप्तये लक्ष्मीहोमं करिष्ये ॥ विज्ञानसंपत्सुखदां सनातनां विचित्रवाग् भूतिकरीं मनोहराम् ॥ अनंतसंमोदसुखप्रदायिनीं नमाम्यहंभूतिकरीं महाश्रियम् ॥ १ ॥ समस्तभूतान्तरसंस्थिता त्वं समस्तभोक्तेश्वरि विश्वरूपे ॥ तन्नास्तियेत्त्व-तिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहंश्रीः ॥ २ ॥ दारिद्र्यदुःखौघ तमोपहंत्री त्वत्पादपद्मं मयि सन्निधत्स्व ॥ दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षै रभिषिंच मां श्रीः ॥ ३ ॥ अम्बप्रसीद करुणासुदयार्द्रदृष्ट्या मां त्वत्कृपा

होमे समाप्त थया पछी गोरे चार स्त्रियोने तथा परणनारने लई घरमां भवुं. त्यां जई गोत्रज सामे बेसाडी पोस भरावबी. तेमां फंफु करी पान ७ सोपारी ७ पैसा ७ रु. १ मुकाववो. तथा चार स्त्रीयो पासे चार चार पसली भात वधाववुं पछी घरमांथी परणनारने वेदीने बहार महयज्ञनी जगापर आवी पूर्वाभिमुखे उभारही हाथमांनी पोसना पदार्थ महना मंडपपासे मुकी देवा तथा माताना जमणा हाथतरफ पाटला पर बेसी स्थापित देवताओनुं उत्तरपूजन थाय तेमां भाग लेवो. केटलीक न्यातोमां परणनारने स्त्रीपुरुषना वचमां बेसाडेछे ए अविहितछे अने शास्त्रना प्रमाणोथी प्रायश्चित्त थरायछे तो तेम बेसवानी जरूर नथी जुवोके रूढी छे छतां प्रायश्चित्त न थतुं होय त्यां रूढी ग्रहण करिये तो अडचण नथी पण धर्म कार्यमां शास्त्रने वेगलुं मूकी अनिष्ट फल आपनारुं कार्य करवुं ए तदन अधोगतीने आपनारुं छे माटे आवी समजण आप्या छतां कोण करशे अर्थात् न करवुं ॥

द्रविण गेह मिमं कुरुष्व ॥ आलोकयत् प्रणत हृद्गतयेन हंत्री त्वत्पादपद्म युगुलं प्रणमाम्यहं श्रीः ॥ ४ ॥ इति ल-
क्ष्मीहोमः अद्येत्यादि० ॥ अमुकवासरे अस्मिन्कर्मणि न्यूनातिरिक्तदोषपरिहारार्थं अष्टोत्तरशत संख्यया वा
अष्टाविंशति संख्यया तिलद्रव्येण व्याहृतिहोमं करिष्ये ॥ अग्निवायुसूर्येभ्यो नमः ॥ इति होमं समाप्य ॥

॥ **अथ उत्तरपूजनं** ॥ अद्येत्यादि० कृतस्य कर्मणः सांगतासिध्यर्थं स्थापितदेवतानां मृडाग्ने श्चोत्तरपूजनं करिष्ये ॥
मृडाग्नयेनमः ॥ गंधं समर्पयामि ॥ मृडाग्नये नमः ॥ पुष्पं स० ॥ मृडाग्नये नमः धूपं स० ॥ मृडाग्नये नमः दीपं

—अनयोः स्वर्यांश्चैव दंपत्योः गुरुशिष्ययोः ॥ नंदीशंकरयो र्मध्ये हन्ति पुण्यं दिवाकृतं ॥ पूजास्विष्टं नवाहुत्यो बलिः पूर्णाहुति स्तथा ॥
संस्त्रवादि त्रिमोक्तांते होमशेषसमापनं ॥ श्रेयः सपात्रदानं च अभिषेको विसर्जन मिति ॥ पूर्वमज्वलितोह्यग्नि र्हविर्द्रिव्यंबुभूक्षितः ॥ तृप्तो निर्धूम
निर्ज्वालो मृडाग्निः परिकीर्तितः ॥ इति ग्रहरत्नवल्यां ॥

—एवा प्रमाणो श्शास्त्र छे माटे ज्ञातापुरुषो वचमां बेसाडवानुं करशे नहि तेम सारा समजु द्विजो करावशे नहि तो हुं तेमनो उपकार मानीश ॥ उत्तर तंत्राग पहेला अनुक्रमे
—उत्तर पूजन करी स्विष्टकृत नवाहुती बलिदान करी पूर्णाहुती करवी. उत्तरपूजन वखते अग्निनुं प्रथम पूजन करवुं. ते मृडाग्नि नामथी पंचोपचारे करवुं. ते
थया पछी गणपती नवग्रहादिनुं पण पूजन करी शक्ति होय तो ग्रहोना दान करवा. ते न बने तो तेनो निष्क्रय मूकवो. पछी नवे ग्रहोने तेना मंत्रोथी
अर्घ्यं आपवा.

स०॥मृडाश्रये नमः ॥ नैवेद्यं स०॥अनया पूजया मृडाभिः प्रीयतां॥विघ्नहर्त्रे गणेशाय सांगायसपरिवाराय नमः गंधं स० विघ्नहर्त्रे० पुष्पं स० विघ्नहर्त्रे० धूपं स० विघ्नहर्त्रे० दीपं० विघ्नहर्त्रे० नैवेद्यं स० साद्गुण्यार्थं दक्षिणां स० अनया पूजया विघ्नहर्ता गणेशः प्रीयतां ॥ सगणेशगौर्याद्यावाहितमातृभ्योनमः गंधं समर्पयामि॥सगणेशगौर्याद्या० पुष्पं स० सगणेशगौर्याद्या० धूपं स०॥सगणेशगौर्याद्या० दीपं स०॥ सगणेशगौर्याद्या० नैवेद्यं स० अनया पूजया सगणेशगौर्याद्यावाहितमातरः प्रीयंतां ॥ आदित्याद्यावाहितदेवेभ्योनमः गंधं समपर्यामि०आदित्याद्या० पुष्पं स० आदित्याद्या० धूपं स०आदित्याद्या० दीपं स० ॥ आदित्याद्या०नैवेद्यं स० अनेन आदित्यादिदेवाः प्रीयंताम् ॥ शक्त्याग्रहदानानि॥ पूजान्ते सुपात्रे जलपुष्पाक्षत फलादीनि निधाय ॥ तत्पात्रं हस्ताभ्यामादाय॥आदित्याद्या-

स्थापितदेवेभ्यो प्रत्येकं पुरुषाहार परिमितानि नैवेद्यानि भवंति ॥ आदित्ये कपिलां धेनुं शंखं सोमाय दापयेत् ॥ भौमे रक्तमनाड्वाहं सोमपुत्राय कांचनं ॥ गुरोश्चपीतवासौसि शुक्रायाश्वसित स्तथा ॥ कृष्णागौ मंदवारस्य राह्वोच्छाग स्तथैवच ॥ कृष्णायसं तथाकेतौ सर्वेषा मेवकांचनं ॥ इति शांतिचिंतामणौ

अर्थ-(१) स्थापित देवोनु उत्तर पूजन थया पछी शक्ति प्रमाणे नवे ग्रहोना दानो करवा ते न बनी शके तेम होयतो तेनो निष्क्रय लइ संकल्प करी मुकवो पछी सारा पात्रमा जळ लइ तेमां गंध, पुष्प, फल, अक्षत द्रव्य, मुकीने हाथे झाली लखेला मजबडे सूर्यथी आरंभी स्थापित देवोने अर्घ आपवा.

ग्रहाः सर्वे पीठेयेऽत्र व्यवस्थिताः ॥ ते गृह्णन्तु मयादत्त मिममर्घ्यंनमोनमः इति मन्त्रेण अर्घंदत्वानमस्कारं स्व स्वमंत्रैःकुर्युः॥नमोरथमादित्यायदिप्यमानस्वतेजसे॥ज्योतिस्थःसर्वभूतेभ्यःससूर्यःप्रीयतां मम ॥१॥ द्विजराज महा तुंग तारापतिरनन्दितः॥मासे मासे क्षयो वृद्धिःससोमःप्रीयतां मम ॥२॥ वालःकुमारको यस्तु रक्तवर्णःसुशोभनः ॥ अव्ययः पृथिवीपुत्रः स भौमः प्रीयतां मम ॥ ३ ॥ सौम्यपुत्रो बुधो सौम्यो बुधोनाम महाग्रहः ॥ आदित्यः पयगोयस्तु सबुधः प्रीयतां मम ॥ ४ ॥ बृहस्पति र्बृहत्तेजो बृहद्बुद्धि र्बृहद्यशः ॥ सुराणां च गुरुर्यस्तु स गुरुः प्रीयतां मम ॥ ५ ॥ असुराणां गुरुर्यस्तु ग्रहाणां परमां गतिः ॥ शुक्रवर्णः शुक्रदीप्तिः सशुक्रः प्रीयतां मम ॥ ६ ॥ शनिश्चरः शनैश्चारी उग्ररूपो रवेः सुतः ॥ कृष्णवर्णः क्रूरदृष्टिः सशनिः प्रीयतां मम ॥ ७ ॥ आसुरः सिंहिकापुत्रो राहुश्चंद्रार्कमर्दनः ॥ स्थापितस्तु निमित्तार्थे स राहुःप्रीयतां मम ॥८॥ अपां तु देव सगणः केतुः कपोतवाहनः ॥ सानुचारः सुमेधाश्च सकेतुः प्रीयतां मम ९ ॥ शम्भुःप्रभृतयो देवाः पीठे येऽत्रमयार्चिताः ॥ ते सर्वेशुभदाः संतु सायुधाः सानुगाः सदा ॥ १० ॥ इति प्रार्थयेत् ॥ ततो हुतशेष हविर्दव्यं स्त्रुचिपूरितं गृहीत्वा ॥ ग्रहान्वारब्धः

स्विष्टकृद्धोमं कुर्यात ॥ अग्नये स्विष्टकृते नमः ॥ इदमग्नये स्विष्टकृते नमम ॥ **ततो नवाहुतयः** ॥ अग्नये नमः इदमग्नये नमम ॥ वायवे नमः ॥ इदंवा० ॥ २ ॥ सूर्याय इदं सूर्याय० ॥ ३ ॥ अग्निवरुणाभ्यां० इद मग्निवरुणाभ्यां० ॥ ४ ॥ पुनः ॥ अग्निवरुणाभ्यां० इदमग्निवरुणाभ्यां ॥ ५ ॥ अग्नये अयसे नमःइदमग्नयेअयसे० वरुणाय सवित्रे विष्णवे विश्वेभ्योदेवेभ्यो मरुद्भ्यः स्वर्केभ्यो० इदंवरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ॥७॥ वरुणायादित्यायादितये नमःइदं वरुणायादित्यायादितये०॥८॥प्रजापतये नमः इदं प्रजापतयेनमम ॥९॥ **अथ बलिदानं** ॥तत्रैवं॥ अग्न्यायतनस्य दिक्षु विदिक्षु च दशदिक्पालान् माषभक्तबलयो देयाः ॥अद्येत्यादि०॥ कृतस्य कर्मणः सांगतासिध्यर्थं दिक्पालपूर्वकस्थापितदेवतानां बलिदानं करिष्ये ॥प्राच्यां दिशि॥ इन्द्रं सांगं सपरिवारं सायुधं

(१) स्विष्टकृद्धोमः सर्वद्रव्यैः कार्यः ॥ इति शरति कमलाकरे ॥ (२)बलिहीने तु दुर्भिक्षंगंधहीनत्वयोग्यता ॥ धूपहीने तथोद्वेगो वस्त्रहीने धनक्षयः ॥ इति भविष्यपुराणवाक्यात् ॥

अर्थ (१)होमता रेहेलु द्रव्य तेमाथी थुथी भराय एटलुं लइ अग्निमां आहुति आपवी, तेनेस्विष्टकृत केहेछे. तेपछी नव आहुती नीचे मूजबो आपवी (२) कुडनी अथवा स्थंडिलनी दशनाशुये इन्द्रादिदेवोने माटे बली दान (वडा-पुरी दुध पाक दीवो) गोठवी तेना प्रत्येकनु पूजन करी संकल्पकरवो पछी प्रार्थना करेली थया बाद गणपतीनवेग्रहोने बली मूकवु-तथा क्षेत्र पालनु बली करवु.

सशक्तिकं एभिर्गंधाद्युपचारैः त्वामहं पूजयामि ॥ इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि भो इन्द्र दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ इन्द्रःसुरपतिर्जिष्णुः स्वर्लोकेशो महाबलः॥ शतयागाधियोदेव स्तस्मै यागात्मने नमः ॥ प्रार्थनां समर्पयामि ॥ अनेन बलिदानेन इन्द्रः प्रीयतां नमम ॥ एवं सर्वत्रोहः कार्यः ॥ आग्नेयां ॥ अग्निं सांगं सपरिवारं सशक्तिकं एभिर्गन्धा० अग्नये सांगाय सपरिवाराय० इमं सदीप माषभक्तबलिं स० भोअग्ने दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुः कर्ता शांतिक० पुष्टिक० तुष्टिक० निर्विघ्नक० वरदो भव ॥ सर्वदेवमयो देवो रक्तोवन्हिर्महाबलः ॥ सप्तजिह्वो महावीर्यो नमो वैश्वानरायते ॥ प्रार्थनां स० ॥ अनेन पूजनेन अग्निः प्रीयतां नमम ॥ दक्षिणस्यां ॥ यमं सागं सपरिवारं सायुधं सशक्तिकं एभिर्गंधाद्यु० यमाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं स० भो यम दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुः कर्ता शान्तिक० पुष्टिक० तुष्टिक० निर्विघ्नक० वरदोभव ॥ दंडहस्तमयोदेवो धर्माध्यक्ष महाबलः ॥ आवाहये महादेवं तस्मै कालात्मनेनमः ॥ प्रार्थना स० अनेन पूजनेन

यमःप्री० ॥ नैर्ऋत्यां ॥ निर्ऋतिं सांगं सपरिवारं सशक्तिकं एभि गंधा० निर्ऋतये सांगाय सपरिवाराय इमं सदीपं मापभक्तबलिं स० भो निर्ऋते दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुः कर्ता शान्तिक० पुष्टिक० तुष्टिक० निर्विघ्नक० वरदो भव ॥ राक्षसेभ्यो च रक्षार्थं भवन्नेत्रप्रतिष्ठितं ॥ निर्विघ्नयज्ञभूमिं च कुरु त्वं राक्षसाधिप॥ प्रार्थनां स०॥अनेन पूजनेन निर्ऋतिःप्री०॥ प्रतीच्यां वरुणं सांगं सपरिवारं सायुधं सशक्तिकं एभि गंधा० वरुणाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपंमापभक्तबलिं स० भो वरुणदिशंरक्ष बलिं भक्ष ममसकुटुंबस्याभ्युदयं कुरुकुरु ॥ आयुःकर्ता पुष्टिक० तुष्टिक०निर्विघ्नक० वरदो भव॥पाशहस्तात्मकोदेवो जलराजाधिपो महान्॥निम्नगामीतिविख्यातो वरुणाय नमोनमः॥ प्रार्थनां स० अनेन पूजनेन वरुणःप्री०॥वायव्यां वायुं सांगं सपरिवारं सायुधं सशक्तिकं एभिर्गंधा०वायवे सांगाय सपरिवाराय सशक्तिकाय इमं सदीपमापभक्तबलिं स०भो वायो दिशंरक्ष बलिंभक्ष ममसकुटुंबस्याभ्युदयं कुरुकुरु॥ आयुःकर्ता पुष्टिक० तुष्टिक० निर्विघ्नक० वरदोभव वायुस्तुबलमाक्रम्य वायुराजः सुपूजितः ॥ अहोवायो मृगारूढ दशारक्षनमोनमः प्रार्थनां स० अनेन पूजनेन वा० प्री० ॥ ॥ उदीच्यां ॥ सोमं सांगं सपरिवारं सायुधं सशक्तिकं एभि गंधा० ॥ सोमाय सांगाय सपरिवाराय सशक्तिकाय

इमं सदीपमापभक्तबलिं स० भोसोम दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुःकर्ता पुष्टिक० तुष्टिक० निर्विघ्नक० वरदो भव ॥ नक्षत्राणां च सर्वेषां सोमराजा प्रकीर्तितः ॥ रत्नांगी च महाहस्त सोमराजाय ते नमः॥ प्रार्थनां स० अनेन पूजनेन सोमःप्री०॥ईशान्यां ॥ईश्वरं सांगं सपरिवारं सायुधं सशक्तिकं एभि गंधा० ईश्वराय सांगाय सपरिवाराय सशक्तिकाय इमं सदीपमापभक्तबलिंस० भो ईश्वर दिशंरक्ष बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुःकर्ता पुष्टिक० तुष्टिक० निर्विघ्नक० वरदोभव ॥ विद्याधरायभूतेश ज्ञानभूर्वेदपारगः॥ सुदेशोदेवपूज्यश्च भूपालश्च बलिप्रियः ॥ प्रार्थनां स० ॥ अनेन पूजनेन ईश्वरःप्रीयतां नमम ॥ पूर्वेशानयोर्मध्ये उर्ध्वायां ब्रह्माणं सांगं सपरिवारं सायुधं सशक्तिकं एभि गं० ॥ ब्रह्मणे सांगाय सपरिवाराय सशक्तिकाय ॥ इमं सदीपमापभक्तबलिं स० ॥ भो ब्रह्मन् दिशंरक्ष बलिंभक्ष ममसकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुःकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नक० वरदोभव॥ ब्रह्मानुबलमाक्रम्य ब्रह्मराजः सुपूजितः॥ अहोबुद्धः स्थितो ब्रह्मा उर्ध्वस्यामस्त सर्वदा ॥ प्रार्थनां स० ॥ अनेन पूजनेन ब्रह्मा प्री० ॥ निर्ऋति पश्चिमयो र्मध्ये ॥ अधस्थायां ॥ अनंतं सांगं सपरिवारं सायुधं सशक्तिकं एभि गं० ॥ अनंताय सांगाय सपरिवाराय सशक्तिकाय इमं सदीपमापभक्त बलिं

स० भो अनंत दिशंरक्ष बलिंभक्ष ॥ मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥ आयुःकर्ता पुष्टिक० तुष्टिक० निर्विघ्नक०
वरदोभव ॥ यो सावनंतरूपेण ब्रह्माण्डं सचराचरं ॥ पुष्पवद्धारयते मूर्ध्नि तस्मै नित्यंनमोनमः ॥ प्रार्थनां स० ॥
अनेन पूजनेन अनंतः प्री० ॥ ततो गणपतिसमीपे बलिं निधाय ॥ गणपतिं सांगं सपरिवारं सशक्तिकं एभि-
गंधा० ॥ गणपतये सांगाय सपरिवाराय सशक्तिकाय इमं सदीप माषभक्तबलिं स० ॥ भोगणपते दिशंरक्ष
बलिंभक्ष मम सकुटुंबस्याभ्युदयं कुरु कुरु ॥आयुःकर्ता पुष्टिक० तुष्टिकर्ता निर्विघ्नकर्ता वरदोभव॥ वक्रतुण्डम-
हाकाय सूर्यकोटि समप्रभ ॥ अविघ्नं कुरु मेदेव बलिंभक्ष नमोनमः ॥ प्रार्थनां स० ॥ अनेन पूजनेन गणपतिः
प्री० ॥ सगणेश गौर्याद्यावाहितमातृः सांगाः सपरिवाराः सायुधाः सशक्तिकाः ॥एभि गंधा० सगणेशगौर्याद्या-
वाहित मातृभ्यो सांगाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीप माषभक्तबलिं स० भोभो सगणे-
शगौर्याद्यावाहितमातरः दिशंरक्षत बलिंभक्षत मम ग्रहे सकलकुटुंबस्याभ्युदयं कुरुत आयुः कर्त्र्यः पुष्टिकर्त्र्यः
तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः वरदाःभवत ॥ अम्ब त्वद्दत्तवाक्यानि बलिपूजादियत्कृतं ॥ तानि स्वीकुरु सर्वज्ञे
दयालुत्वेन सादरं ॥ प्रार्थनां स० ॥ अनेन पूजनेन सगणेशगौर्याद्यावाहित मातरः प्रीयंतां॥ ग्रहबलिदानं॥आदि-

त्यादिदेवान् सांगान् सपरिवारान् सायुधान् सशक्तिकान् एभि गंधा॰ आदित्यादि देवेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपमापभक्तबलिं स॰ ॥ भो भो आदित्यादि ग्रहाः दिशंरक्षत बलिंभक्षत ममाभ्युदयंकुरुत आयुः कर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवत ॥ ग्रहाराज्यं प्रयच्छन्ति ग्रहाराज्यं हरन्ति च ॥ ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरं ॥ प्रार्थनां स॰ ॥ अनेन पूजनेन आदित्याद्यावाहित देवाः प्रीयंतां नमम ॥ क्षेत्रपाले बलिं ॥ अद्यपूर्वोच्चरित॰ सकलारिष्टशान्त्यर्थं क्षेत्रपालपूजन बलिदानं च करिष्ये ॥ क्षेत्रपालबलिद्रव्याय नमः इति यथाशक्ति गंधादिभिः पूजयेत् ॥ क्षेत्रपालाय सांगाय भूतप्रेतपिशाच डाकिनी शाकिनी वेतालादि परिवारयुताय सायुधाय सशक्तिकाय सवाहनाय इमं सदीपमापभक्तबलिं स॰ भो भो क्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष ममसकुटुंबस्याभ्युदयंकुरु कुरु ॥ आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव॥प्रार्थनां॥ह्रींनमः क्षेत्रपालस्त्वं भूतप्रेत गणेः सह॥पूजां बलिं गृहाणेमं

अर्थ— (१) क्षेत्रपालनुं बली छाबडीमा अथवा सुपडामा मुकवु–तेमा पुष्कळ भात भरवो. तथा पुरी दुध पाक वडा जे कर्युं होय ते मुकी चोखडो दीवडो करी नार दिवेट मुकी तेनु मंत्र प्रमाणे पुजन करी बलीनो संकल्प करवो तथा ते बली चकले मुकाववु–ते बली लेनार ब्राह्मणनुं पूजन करी दक्षिणा आपी तेनी पासे मुकाववो–ते न होय तो जाते चकले जइ यजमाने मुकवो.

सौम्यो भवतु सर्वदा॥१॥आरोग्यमायुर्मेदेहि निर्विघ्नं कुरुसर्वदा॥ह्रीं नमःक्षेत्रपालाय महाबल पराक्रमाय वर्वरकेशाय समस्त व्यापकाय चतुःषष्ठिरूपाय नगरग्रामक्षेत्रवनव्यापिने सकलजगत्पूजिताय ॥ह्रां ह्रीं ह्रुंक्षेत्रपाल वलिं गृहाण भैरवरूपेण कुरु कुरु क्रूंक्रूंफांफांह्रींह्रींडमरु डमरु कुरुते यमदंडहस्ते हुंहुंहुं रूपादि किलि किलि किलितं पातुनः क्षेत्रपालः ॥ यंयंयंयक्षरूपंदशदिशिवदनं भूमिकंपायमानं संसंसंहारमूर्तिशिरसिधृतजटाशेखरं चन्द्रविंबं ॥ दंदंदं-दीर्घकेशं कृतनखपुषं उर्ध्वरेखाकरालं पंपंपंपापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालं ॥ १ ॥ इति संप्रार्थ्य ॥ अने-नपूजनपूर्वक वलिदानेन क्षेत्रपालः प्रीयतां ॥ वलिग्राहि ब्राह्मणं पूजयेत् ॥ वलिं विसृज्य तत्स्थानं जलेन संप्रो-क्ष्य ॥ ब्राह्मणाः शांन्तिसूक्तं पठेयुः ॥ आदौ नमामि चतुराननवंद्यमान मिच्छानुकूल मखिलं च वरं ददानं ॥ तंतुंदिलं द्विरसनाधियज्ञसूत्रं पुत्रं विलासचतुरं शिवयो शिवाय ॥ १ ॥ आदौनमामि भजतामभिलाषदात्री धात्री समस्तजगतां दुरितापहंत्री ॥ संसारबंधनविमोचनहेतुभूतां मायां परां समधिगम्यपरस्यविष्णोः ॥ २ ॥ आदौस्मरामि भवभीतिमहार्तिशान्त्यै नारायणंगरुडवाहन मञ्जनाभं ॥ ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं

अर्थ—(१) वलीदान मुक्या पछी ब्राह्मणोए शांति पाठना मंत्रो भणवा—

तरुणवारिजपत्रनेत्रं ॥ ३ ॥ आदौनमामि मनसा वचसाचमूर्ध्ना पादारविंदयुगलं परमस्य पुंसः ॥ नारायणस्य नरकार्णवतारणस्य पारायण प्रवण विप्र परायणस्य ॥ ४ ॥ यजमानः पाणि पादं प्रक्षाल्याचम्य पूर्णाहुति होमं कुर्यात् ॥ अद्यपूर्वोच्चरित कृतस्य कर्मणः सांगतासिध्यर्थं वसोर्धारा समन्वित पूर्णाहुति होमं करिष्ये ॥ **अथ पूर्णाहुतिः** ॥ चतुर्गृहीत आज्यमादाय तदुपरि रक्तवस्त्रेणाच्छादितं, सुशोभितं कृत्वा नालिकेरं निधाय, ततो स्थानात् उत्थाय पूर्णाहुति मंत्रान् पठेत् ॥ तत्र मंत्राः ॥ चतुःशृंग त्रिधाबद्धो द्विमूर्धा नासिका द्वयं ॥ षण्नेत्र श्च चतुःश्रोत्र त्रिपादः सप्तहस्तकः ॥ १ ॥ याम्यभागे चतुर्हस्तः सव्यभागे त्रिहस्तकः ॥ स्रुवं स्रुचं तथा शक्ति मक्षमालां च दक्षिणे ॥ २ ॥ तोमरं व्यंजनं चैव घृतपात्रं

अर्थ-(१) पूर्णाहुती वखते स्रुचीमां चार सरवा घी लेवुं तथा तेनापर नारियल मुकवुं. तेने लाल कपडो वींटाळी अबील गलाल सिंदूरथी सुशोभित करवुं. पछी ते लई उभा थवुं, तथा यजमाने आचार्यने अडकी रेहेवुं. तथा यजमान पत्नीये पोताना स्वामीने अडकवुं तथा कुंटुंब तथा पुत्रोये पण सर्वे उभा रहेवुं. गोरे आवेला महस्थोने चांदलाकरी भात चोडवुं. त्यारबाद नारीयल होमाया पछी वसोर्धारा होम थया पछी आवेला गृहस्थोए पोतानी जगाये बेसीजवुं—आ ठेकाणे शेभाना शेशाद० सगावालाने नोतरवानो संप्रदाय छे तथा जे आव्या होय तेने चांदलोकरी भात चोडी नाडुं बंधि छे. पछी पूर्णाहुतिनुं काम थया पछी केटलीक न्यातोमां गोळ धाणा पण आपेछे, ए संप्रदायछे.

तु वामके ॥ नियुक्तः सप्तभिर्हस्तै ऽर्द्विमुखः सप्तजिह्वकः ॥ ३ ॥ दक्षिणे च चतुर्जिह्व स्त्रिजिह्व श्चोत्तरे मुखे ॥ कोटि द्वादशमूर्त्यास्यो द्विपंचाशत्कलायुतः ॥ ४ ॥ स्वाहा स्वधावषट्कारैरंकितो मेषवाहनः ॥ रक्तमाल्याम्बरधरो रक्तपद्मासनस्थितः ॥ ५ ॥ पिंगाक्षो लोहितग्रीवःकृष्णवर्मा हुताशनः ॥ ज्वालामालाततनुः सप्तार्चिरमितद्युतिः ॥ ६ ॥ नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ॥ नमआवहवनीयाय महावेद्यो नमोनमः ॥ ७ ॥ नमस्ते सभ्यरूपाय नमो गृह्याग्निरूपिणे ॥ पंचाग्निरूपिणे तुभ्यं नमस्ते परमात्मने ॥ ८ ॥ महाराजैकराजाय नमस्ते भक्तवत्सल ॥ काण्डद्वयोपपाताय ब्रह्मकर्मस्वरूपिणे ॥ ९ ॥ स्वर्गाय स्वर्गदात्रे च यज्ञेशाय नमोनमः ॥ नमोऽग्निहोत्ररूपाय नमः परमेष्ठिरूपिणे ॥ १० ॥ चातुर्मास्यस्वरूपाय नमः पश्विष्टिरूपिणे ॥ सौत्रामिणे नमस्तुभ्य मग्निष्टोमाय वै नमः ॥ ११ ॥ अत्यग्निष्टोमरूपाय तथा चोक्थ स्वरूपिणे ॥ नमः षोडशरूपाय वाजपेयाय वै नमः ॥ १२ ॥ अतिरात्र नमस्तुभ्य माप्तोर्याम नमोनमः ॥ नमोस्तु सर्व भूताना माधाराय महात्मने ॥ १३ ॥ एकत्रि पंचभिर्वक्त्रै र्दीप्यमानषडात्मने ॥ नमःसमस्तदेवानां वृत्तिदाय सुवर्चसे ॥ १४ ॥ शक्ररूपाय जगता मशेषाणां स्तुतिप्रद ॥ त्वंमुखं सर्वदेवानां त्वयात्तं भगवान् हविः ॥ १५ ॥ रुद्रतेजसमुद्भुतो वरदोहव्यवाहनः ॥

अग्निर्वैश्वानरः साक्षात् तस्मै नित्यं नमोनमः ॥ १६ ॥ इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सत्पते अग्नये अद्भ्यश्च नमम ॥ नालिकेरं होमयेत् इति पूर्णाहुतिः ॥ ततो वसोर्धारां जुहुयात् ॥ तत्र मंत्राः ॥ ॥ ऋषिरुवाच ॥ १ ॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥ तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः॥ ३ ॥ यस्याः प्रभावमतुलंभगवाननन्तो ब्रह्माहरश्च न हि वक्तुमलं बलं च॥सा चण्डिकाऽखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु॥४॥या श्रीःस्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताःस्म परिपालय देवि विश्वम्॥५॥किं वर्णयाम तव रूपमचिन्त्यमेतत् किंचातिवीर्यमसुरक्षयकारी भूरि॥ किंचा हवेषु चारतानि तवातियानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥६॥ हेतुःसमस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाऽखिलमिदं जगदंशभूतमव्याकृताहि परमा प्रकृति-

---

आप्रमाणे पूर्णाहुति थयापछी वसोर्धारानो होम थवोजोइये पण तेम करतां नथी पूर्णाहुतिमां केवल नालिकेर लइ मंत्रोभणी स्रुचमां मुकी घीसाथे होमवुं अने वसोर्धारामां घीनीधारा अखंडित थवी जोइए जेनाथी कर्मकरनारनेसनारनुं जोडुंखंडित थतुं नथी एवाकार्यो श्रद्धा तथा उदारताथी करवाना छे ॥

स्त्वमाद्या ॥ ७ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहाऽसि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥ या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः॥मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा भगवती परमा हि देवि॥९॥ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्॥देवि त्रयी भगवती भवभावनाय वार्ताच सर्वजगतां परमा-र्तिहन्त्री ॥१०॥ मेधाऽसि देवि विदिताखिलशास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसंगा ॥ श्रीःकैटभारिहृदयैककृता-धिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा॥११॥ईषत्सहासममलंपरिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्त-म्॥अत्यद्भुतं प्रहृतमात्तरुषा तथाऽपि वक्त्रं विलोक्य सहसा महिषासुरेण॥१२॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ॥ प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १२ ॥ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ॥ विज्ञातमेतदधुनैव यदस्तमेत न्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥ ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्म-वर्गः ॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाऽभ्युदयदा भवती प्रसन्ना ॥ १५ ॥ धर्म्याणि देवि सक-

त्थानासनाद्यैश्च सन्मानाकरणा तथा॥ २२ ॥ तांबूल व्यंजनाद्यैश्च पादसंवाहनादिभिः ॥ सुचाटुवचनं चैव शुश्रुषा करणं तथा ॥ २३ ॥ ताडितायां क्रुधापत्यु रोदनं प्रति ताडनं ॥ पतिवाक्य मनादृत्य प्रत्युक्ति करणं तथा ॥ २४ ॥ भर्तुकथामनादृत्य परेषां गुणकीर्तनम् ॥ उत्सवादिषुबंधूनां भुवने वसनं चिरं ॥ २५ ॥ रोद्रायां मृतवत्सायाः संपर्कश्चैदभाषणम् ॥ भर्तृपूर्वंच शयनं पश्चादुत्थापनं तथा ॥ २६ ॥ मृते च भर्तरि सह गमना करणंतथा॥केशानां रक्षणं चैव द्विवार भोजनं तथा ॥ २७ ॥ पर्यंङ्के शयनं चैव स्रक् ताम्बूल निसेवनात ॥ शरीरपोषणं चैव शैय्याया मन्नभक्षणं ॥ २८ ॥ कलिंगादिनिशिद्धस्य दग्धान्नस्य च भोजनं ॥ पलाण्डु लशूनादीनां कुष्मांडस्य च भक्षणं ॥ २९ ॥ मसूरादी निषिद्धानां भक्षणं गर्भपातनं ॥ फलानां हरणंदेव ब्रह्मस्व हरणं तथा ॥ ३० ॥ भर्तृघ्नी भि स्तथागर्भ घातिनिभिस्तथैवच ॥ कुलटाभिः सुरापानं रतीभिः सहभोजनं ॥ ३१ ॥ सुगंध द्रव्य हरणं कस्तुरी कुंकुमादिकं ॥ तैल दुग्ध घृतादीनां विक्रयो फलविक्रयः ॥ ३२ ॥ कन्याविक्रयणंचैव दास्यादिनां चविक्रयः ॥ रसानां विक्रयश्चैव मधु तक्रस्य विक्रयः ॥ ३३ ॥ यूका मत्कूण सर्पाणां हिंसनं प्राणिहिंसनम् ॥ दंपत्योभ्रतिभेदश्च कूटसाक्षि स्तथैवच ॥ ३४ ॥ विवाहे विघ्नकरणं तडागादि

अभेदनं ॥ वापी कूपतडागेषु विषप्रक्षेपणं तथा ॥ ३५ ॥ ज्वालनंपरवेश्मानां सपत्नीबालघातकं ॥ मिथ्याप-
वादकरणं बालानां मारणं तथा ॥ ३६ ॥ गो ब्राह्मण देवानां वृत्तिच्छेदन मेवच ॥ उद्यापन विहीनानां
व्रतानां करणं तथा ॥ ३७ ॥ सुवर्ण रौप्य रत्नानां स्तेयो विक्रयमेव च ॥ पतिनिंदा सती निंदा तपस्वी-
निंदनं तथा ॥ ३८ ॥ पशूनां हिंसनंचैव देव ब्राह्मण निंदनं ॥ शौचाचारविहीनत्वं प्राणीनां पीडनं तथा ॥
॥ ३९ ॥ अपात्रेदानकरणं पात्रद्वेष स्तथैवच ॥ श्रमितानां क्षुधार्तानां दासादीनां तथैव च ॥ ४० ॥
सक्रोधमन्नदानं च कुटिलाक्षेपसंयुतं ॥ तीर्थयात्रा विहीनत्वं अनास्तिक्य मनार्जवम् ॥ ४१ ॥ स्वपतिद्वेषकरण
मात्मघातस्तथैवच ॥ सुप्तेपत्यौ शइतव्यं भुक्तेभोजन माचरेत् ॥ ४२ ॥ उत्थानात्पूर्व मुत्थाय सदातद्धितमा-
चरेत् ॥ कोपनंकर्हिचित्कुर्यात रुष्टेतु मुदिता भवेत् ॥ ४३ ॥ दुःखिते बहुदुःखा च प्रोषिते मलिना-कृशा ॥
अयमेवपरोधर्मो नारीणां परिकीर्तितः ॥ ४४ ॥ एतद्धर्मव्यपायेन रजोयुक्ता चयद्भवेत् ॥ पातकं सुमहच्चैव इह
वा परजन्मनि ॥ ४५ ॥ मयाकृतानि घोराणि पापानि सुबहुन्यपि ॥ एतेषां क्षालनार्थाय प्रायश्चित्तमहं वृणे
॥ ४६ ॥ एतत्पापविशुध्यर्थं प्राजात्य त्रयंचरेत् ॥ इदं गोमिथुन द्रव्यं गंधपुष्पाद्यर्चितं सभ्योपविष्टेभ्यो ब्राह्मणेभ्यो

ऽहं संप्रदास्ये ॥ गुरुलघुपापानां विशोधनार्थं प्रायश्चित्तमहंयाचे ॥ यान्यतामिति ब्राह्मणोब्रूयात ॥ प्रजापत्य संकल्पः ॥ अद्येत्यादि० तिथौ ममदेहशुध्यर्थंकरिष्य माणकर्मण्यधिकारार्थं यथासंख्याकान् प्राजापत्यान् रजत् प्रत्याम्नायद्वारा अहमाचरामि तेनकरिष्यमाणकर्मण्यधिकार सिद्धिरस्तु॥ अनेन कृतप्रायश्चित्तेनामुकगोत्रो-हममुकनामाहं निष्पापोभवेयमिति त्रिर्वाच्यं ॥ अहंनिष्पापो भूयासं अहं निष्पापो भूयासं अहंनिष्पापो भूयासं॥ मम देह शुद्धि रस्तु मम देद शुद्धिरस्तु मम देह शुद्धिरस्तु ॥ अहं एतत् कर्म योग्यो भूयासं अहं एतत् कर्म

अर्थ-गोदाने वत्सयुक्तागौ सुशिला सुपयस्विनि । रूपदाने शुभेनद्यान् सुशुक्लांवर कांचनः ॥ १ ॥ निरूतेनाग्नि भू दाने धरादद्यात् द्विजातये ॥ दद्य दसेन दंडेन निशदंडाभिवर्तितं ॥ २ ॥ दशनान्येव गोचर्मे दन्यापापैः । इति सूर्यारुण संवादग्रंथे । एकभक्तेन नक्तेन तथैवायाचिते न च । उपवासेन चैवायं पादकृच्छ्रः उदाहृतः । इति अत्रिस्मृतौ ॥

अर्थ-स्त्रीनो प्रायश्चित्त प्रयोग थया पछी पुरुष प्रमाणे राखेली हाथमा वस्तु नीचे भगवान् पासे मुकी नमस्कार करावो, तथा संकल्पकरवो के जे मे मारी शक्तिप्रमाणे प्रायश्चित्त कर्यु तेनाथी मने अमुक कर्म करवा अधिकार थाओ, पछी सभा दंडना शक्तिप्रमाणे पैसाब्राह्मणोना पगआगाडी मुकी. यजमानेकेहेवु. हु पापवगरनो थयो, मारोदेहशुद्धथयो. हु आकर्मकरवायोग्यथयो एम त्रणवखततकेवाथी. ब्राह्मणोये कहेवु, उपरप्रमाणे पछी ब्राह्मणोने नमस्कारकरी. उदिच्यान्हविष्णुश्राद्ध करवुं,

योग्यो भूयासं अहंएतत् कर्म योग्यो भूयासं ॥ एवं यज नान्कृते द्विजाः ब्रूयुः॥त्वं निष्पापो भूयाः त्वं निष्पापो भूयाः त्वं निष्पापो भूयाः ॥ तवदेह शुद्धिरस्तु ॥ तवदेहशुद्धि रस्तु ॥ तव देहशुद्धिरस्तु ॥ त्वं एततकर्म योग्यो भव ॥ त्वं एततकर्म योग्यो भव ॥ त्वं एतत कर्म योग्यो भव ॥ एवंवारत्रयं द्विजमुखा च्छ्रुत्वा सभोपविष्ट ब्राह्मणानां पादाभिवंदनं कुर्यात् ॥ अद्येत्यादि० प्रायश्चित्तस्योत्तराङ्गानि करिष्येति संकल्प्य ॥ उत्तराङ्गा विष्णुश्राद्धं ॥ विष्णोएतत्तेपाद्यं पादावनेजनम् प्रक्षालनम् ॥ इदमत्र चंदनं च पुष्पम् ॥ स्वपादौ करौ प्रक्षाल्याचम्य विष्णुमंत्रेणादि त्वंधः ॥ अक्षतान् गृहीत्वा ॥ नमस्ते देवदेवेश पुराण पुरुषोत्तम ॥ इदं श्राद्धं हृषीकेशरक्षत्वं सर्वतो दिशि ॥ १ ॥ पूर्वेनारायणः पातुवारिजाक्षस्तु दक्षिणे ॥ प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे ॥ २ ॥ आयान्तु उत्तराङ्ग वैष्णवश्राद्धोपहारणां पवित्रतास्तु ॥ अद्येत्यादि० तिथौ

मिता क्षरा महार्णव नारायण भट्टादि भिरुक्त प्राजापत्य प्रत्याम्नायाः कथ्यंते । तच्च सर्वं प्रायश्चित्तं शक्त्यानुसारेण पडब्दं त्र्यब्दं सार्द्धाब्दे अन्यद्वा पर्षदोनुमतं । प्राजापत्यप्रत्याम्नायाश्च गायत्र्या युत जपेन । गायत्र्या तिल होम सहस्रेण । द्वादश ब्राह्मण भोजनेन तीर्थे योजन यात्रया एक गोदानेन । स्वर्ण रूप्ययो निष्कं तदर्द्धं तदर्द्धेन वा द्वात्रिंशत्पणैर्वा गोमूल्या नामशक्त्या दानेन शुष्ककेशस्य द्वादशस्नानेन द्विगुण-द्वादशप्राणायामादौ चैकः प्राजापत्य इति ॥ निष्क (माषा ४०) तदशक्तौ द्वात्रिंशताम्रपणाः कनिष्ठाः ॥

प्रायश्चित्तोत्तराङ्ग वैष्णव श्राद्धमहं करिष्ये ॥ विष्णवे इदमासनम् ॥ इदमन्नचंदनं पुष्पं धूपं दीपं यथादत्तं गंधाद्यर्चनं विष्णवेन० इदंवोज्योतिः वैष्णवश्राद्धस्यार्चनविधेः परिपू० ॥ आचम्य विष्णु प्रीतये त्रिप्योधिकान् युग्मान् ब्राह्मणान् पूजापूर्वकं भोजन निष्क्रय द्रव्य दान द्वारा अहमाचरामि ॥ आमान्नंवा दद्यात् सुप्रोक्षितादि करणं वैष्णवश्राद्धप्रतिष्ठासिध्यर्थं दक्षिणां विष्णवे० अद्यपूर्वोच्चरित उत्तरांगवैष्ण- वश्राद्धविधेः परिपू० इति उत्तरांग ॥ विष्णुश्राद्धम् ॥ उत्तराङ्गगोदान द्रव्यंगृहीत्वा अद्येत्यादि० तिथौ प्रायश्चित्तस्योत्तराङ्गत्वाविहितं गोदानप्रत्याम्नायत्वेन यथाशक्तिगोमूल्यनिष्क्रयद्रव्यं विष्णुरूपाय ब्राह्मणाय तुभ्य महं संप्रददे ॥ इत्युत्तरांङ्ग गोदानं ॥ आचम्य सत्येशस्य यथाशक्त्या पूजनं करिष्येति संकल्प्य अष्टशक्तिसहित

तिलाल्हेहं हिरण्यं च कार्पासं लवणं तथा । सप्तधान्य क्षिति गौश्च एकैकं पावन स्मृतं ॥ इति गारुडे ॥ व्रिहयो यव गोधूमा मुद्गा माषा प्रियंगवः । तिलाश्च सप्तमप्रोक्ता सप्तधान्य मुदाहृतं ॥ इति देवयानीये ॥

अर्थ—वैष्णवश्राद्ध यथा पछी, उत्तराङ्ग गोदान आपवुं, ते प्रत्यक्ष न होय तो तेनुं मूल्य यत्किंचित्लेवुं तथा अन्य गोमिथुन एटले वाछरडा वाछरडी प्रत्यक्ष लेवा न होय तो ए ठेकाणे—||आनो लेवानो चालछे, तेवइ संकल्प करवो, तथा स्थापितसत्येश मूर्तिनु

शुचिर्भवेत् ॥ १ ॥ अथ गोमयस्नानं ॥ अग्रमग्रश्चरंतिनां औषधीनां रसंवने ॥ तासां वृषभपत्नीनां पवित्रं काय शोधनं ॥ २ ॥ जन्मरोगं च शोकं च पापं मे हरगोमय ॥ गोमयेन तु यःस्नात्वा आपाद तल मस्तके ॥ ३ ॥ अथ पंचगव्य स्नानं ॥ एकत्रं कृत्वा स्नानं ॥ गोमूत्रं गोमयं क्षीरं दधीसर्पिकुशोदकं ॥ सर्वपाप विशुध्यर्थं पंचगव्यं पुनात्तुमां ॥ ४ ॥ अथ गोरज स्नानं ॥ गवांक्षुरेणनिर्धूतं यद्रेणुगगनेगतं ॥ रजसातेन संलेपो महापातक नाशनं ॥ ५ ॥ अथ धान्य स्नानं ॥ धान्यौषधीमनुष्याणां जीवनं परमं स्मृतं ॥ तेन स्नानेन देवेश मम पापंव्यपोहतु ॥ ६ ॥ अथ फल स्नानं ॥ वनस्पति रसोद्दिव्य फलपुष्पव्रतं सदा ॥ तेन स्नानेन देवेश

दान माचमनं होमं भोजनं देवतार्चनं ॥ मौढ पादो न कुर्वीत स्वाध्याय पितृ तर्पणं ॥ आसनारूढ पादस्तु जान्वोर्वा जंघयोस्तथा ॥ कृतायावत् क्रियायश्च मौढ पाद स उच्यते ॥ इति शाटयायनः ॥ यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ॥ जपो होमस्तथादानं तत्सर्वं निष्फलं भवेत् इतिवन्हि पुराणे ॥ होमदेवार्चनाद्यास्तु क्रियास्वाचमने तथा ॥ नैकवस्त्र प्रवर्तेत द्विजवाचनके जपे ॥ सव्यांद्दशा परिभ्रष्ट कटिदेश-धृतांबरः ॥ एकवस्त्रं त्रयाविद्यात् दैवपित्रे च वर्जयेत् ॥ इति गौतमस्मृतौ ॥ दर्भहिना तु यासंध्या यच्चदानं विनोदकं ॥ असंख्यातं च यज्जप्तं तत्सर्वं निःप्रयोजनं ॥ अवेक्ष्य प्रोक्षणंकृत्वा आलभ्य सोदकेनच ॥ पाणिनास्पृष्ट्वा दानंदद्यात् ॥ इत्यापस्तंबः ॥ सर्वाण्युदकपूर्वाणि दानानि यथाश्रुति विहरेत् ॥ वायंदद्यात्द्विजकरे दानेविधिरयं स्मृतः ॥ सकुशोदकहस्तश्च ददामीति तथावदेत् ॥ इति वाराहपुराणे ॥

फलव्रतमनन्तकं ॥ ७ ॥ अथ औषधी स्नानं ॥ औषधी सर्वं वृक्षाणां तृणगुल्म लताद्रुमाः ॥ दुर्वा सर्षप संयुक्ता सर्वौषध्यः पुनातु मां ॥ ८ ॥ अथ हिरण्य स्नानं ॥ हिरण्यगर्भ गर्भस्थं हेमज विभावसोः ॥ अनंत पुण्यफलदं मम पापं व्यपोहतु ॥ ९ ॥ अथ गंगोदकस्नानं ॥ विष्णुपादाग्रसंभूतां गंगे त्रिपथगामिनी ॥ धर्म द्रव्येति विख्याता पापं मेहरजान्हवी इति गंगोदकस्नानं ॥ १० ॥ वैष्णवोपि भस्माऽभावेकुशोदकस्नानं ॥ कुशमूलेस्थितोब्रह्मा कुशमध्येजनार्दनः ॥ कुशाग्रे शंकरोदेव स्तेननश्यन्तु पातकं ॥ १ ॥ ततोशुद्धोदकेन स्नात्वा ॥ हस्ते पुष्पाक्षतान् गृहीत्वा ॥ अपराधसहस्राणि लक्षकोटी शतानि च ॥ नश्यन्ति तत्क्षणात्पापं सत्येश तवपूजनात् ॥ २ ॥ सत्येशपंचवक्त्रत्वं लक्ष्मीसहजगत्पते ॥ वासुदेवततः पूर्वे नृसिंहो दक्षिणेस्थितः ॥ ३ ॥ कपिलः पश्चिमास्ये तु वाराहश्चोत्तरे स्थितः ॥ ऊर्ध्ववक्त्रेच्युतोज्ञेय एतद्वै ब्रह्मपंचमं ॥ ४ ॥ सत्येशः

अंवर्जानुकरं कृत्वा सकुशंतु तिलोदकं ॥ फलान्यपि च संभाय प्रदद्यात् श्रद्धयान्वितः ॥ इतिगौतम स्मृतौ ॥ पात्रासन्निधाने ॥ मनसापात्रमुद्दिश्य जलंभूमौ विनिक्षिपेत् ॥ विद्यते सागरस्यांतो दानस्यांतो न विद्यते ॥ इति नारदीयपुराणे ॥ दानकाले तु संप्राप्ते पात्रे वा सन्निधौ जल ॥ अन्यविमवते दत्वा दानं पात्रे विधीयते ॥ इति षट्त्रिंशन्मतात् ॥

संस्थितंराजन् पूजाकाले सदैव हि ॥ क्षीरोदपादचंद्रस्य पद्मकर्णिक संस्थितं ॥ ५ ॥ पद्म कौमोदकीशंखच-
क्राण्यस्त्राणि धारणं ॥ ६ ॥ यस्यस्मृत्या चनामोक्त्या तपोयज्ञ क्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्योवंदेत-
मच्युतं ॥ ७ ॥ स्थापितदेवताभ्योनमः ॥ प्रार्थना पूर्वकं नमस्कारं समर्पयामि ॥ कृतस्य० अष्टसंख्याकान् ब्रा-
ह्मणान् यथा संपन्नेनान्नेन तृप्तिपर्यंतं यथाकाले भोजयिष्ये ॥ कृतस्य० नानानांगोत्रेभ्यो ब्राह्मणेभ्यः यथा

पात्रंमनसि सचिंत्य क्रियावित्त गुणान्वितं ॥ देशे काले च संप्राप्ते देयमप्सु विनिक्षिपेत् ॥ उभयासन्निधाने तु विप्राय स्वनैवोक्तः ॥ द्रव्यपात्र विकर्षेत्परोक्षं दातुमुद्यतः ॥ तं ध्यायादि ध्रुवं पात्रं द्रव्यमादित्यदैवतं ॥ इति धौम्यः ॥ नामगोत्र समुच्चार्य संप्रदानस्य चात्मनः ॥ संप्रदेय प्रयच्छंति कन्यादाने तु पुंस्त्रियामिति ॥ नांदीमुखे विवाहे च प्रपितामह पूर्वकं ॥ नामसंकीर्तयेद्विद्वान् अन्यत्र पितृपूर्वकं ॥

अर्थ–दशप्रकारनु स्नान थयापछी शुद्ध जळथी स्नान करवु, पछी फुल चोखा हाथमा लइ विष्णुस्तवेशनीप्रार्थना करवी, प्रार्थना करी भगवानपर फुल चडावी नमस्कार करवो, तथा ब्राह्मण भोजननो संकल्प करवो, तथा ब्राह्मणोने दक्षणा आपवानो संकल्प करवो, तथा कालानापात्रमाथी घी देहडी आगळी धर्मा चार बखत बाहर नाखवुं, पछी तेमा स्नाननु मुकी संकल्पकरी ब्राह्मणने आपवु, तथा सूर्यना दर्शन करी करेला कर्मनो संकल्प करी भगवानने अर्पण करवु, पछी स्नानकरी गंगाजळनु पानकरी गोपीचंदनादी धारणकरी स्वस्थ चित्तथइ मंगळअलंकार धारणकरी कर्म करवाना मंडपमा जइ सारा उत्तम आसनपर बेसवु, एप्रमाणे देहशुद्धिप्रयोग समाप्त थयो.

शक्तिदक्षिणां दास्ये ॥ ततोमुखावलोकनं ॥ दिव्यन्तरिक्षभूमौ वा यन्मे किल्बिषमागतं ॥ तत्सर्वं आज्यसंस्प-
र्शात् प्रणाश मुपगच्छतु ॥ १ ॥ अलक्ष्मीर्यच्चदौर्भाग्यं ममगात्रे व्यवस्थितं ॥ तत्सर्वंशामयेत्वाज्यं लक्ष्मीम्
पुष्टिं च वर्धयत् ॥ २ ॥ आज्यंतेजससमुद्दिष्टं आज्यं पापहरं परं ॥ आज्येसुराणामाहारोआज्येलोकाःप्रतिष्ठिताः
॥ ३ ॥ इदं कांस्यपात्रं घृतपूरितं पंचरत्नसहितं सूर्यदैवतं छायादोषनिवारणार्थं आचार्यायाहं दास्ये ॥ आज्या
भावे अशक्तौ सूर्यावेक्षणं ॥ अद्यपूर्वोच्चरित० भवतां ब्राह्मणानां वचनात् श्रीतीर्थविष्णोः प्रसादात् प्रायश्चित्तविधे
र्यन्न्यूनातिरिक्तं तत्सर्वं परिपूर्णतास्तु ॥ अतः परंस्नात्वा ॥ विष्णवेनमो विष्णवेनमो विष्णवेनमः ॥ इति श्रीज-
यानंदात्मज मूलशंकरशर्मणा विरचितायां विवाह कौमुद्यां तृतीय मुद्यापनप्रकरणे देहशुद्धिप्रयोगः ॥

॥ श्रीगणेशायनमः ॥ श्रीराधापुरुषोत्तमाभ्यां नमः ॥ **श्रीपुरुषोत्तम कृतोद्यापन विधिर्लिख्यते॥**

यथालाभोपहारेण मासे चास्मिन् मलिम्लुचे ॥ पूर्वेन्हि प्रातरुत्थाय कृत्वा पूर्वान्हिका क्रियाः ॥१॥ गृहित्वा निय
मं पश्चात वासुदेवं हृदि स्मरन् ॥ उपवासं स नक्तं वा एक भुक्तस्तु भामिनी ॥ यःकश्चि निश्चयं कृत्वा
प्रीतःस्यात् कृष्णराधिका ॥ तीर्थे गत्वा स्नान विधिपूर्वक प्रायश्चीतं कृत्वा ॥ गृहे आगत्य सर्वं उपहारान्

समिपे गृहित्वा ॥ आसने उपविश्य ॥ यजमानभाले तिलकं कृत्वा ॥ आचम्य ॥ प्राणानायम्य ॥ शिखांबध्वा ॥ **नियम गृहणमंत्रः** ॥ हस्ते गंधाक्षत जल पुष्प पुगीफलानि सहिरण्यानि गृहीत्वा ॥ तत्र मंत्रः ॥

सदोपवीतिना भाव्यं सदाबद्धशिखेन च ॥ विशिखोप्युपवीतिश्च यत् करोति न तत्कृतं ॥ इति कात्यायनोक्तेश्च ॥ तस्मात् शिखाबन्धनानन्तरं सर्व कर्मणा मुपयोगित्वं ज्ञातव्यं ॥ विष्णोश्चरणोदक ग्रहणा नंतरं आसने उपविश्य ॥ इति गोविंदार्चन चंद्रिकायां ॥

जे मनुष्यने राधापुरुषोत्तमदेवनुं अथवा कोइपणदेवनुं उद्यापन करवुं होय तेणे पूर्वांगक्रिया करवानी अवश्यकता छे तेटलु थया पछी जे देवनु प्राधान्यक पणु होय तेनी क्रीया करवामा आवे छे. ए घणा लोकोना अभिप्राय मळवाथी अत्र राधापुरुषोत्तमने प्रधान मानी देवुं यतलयु छे तेमा पुरुषोत्तम मास आवे ते पेहेला तेमा जोयतो साहित्य तैयार करी शुक्लप्रतिपदाए प्रात काले उठी शौचादि निया परवारी तीर्थे जइ स्नान करी तथा प्रात कृत्यपरवारीने ब्राह्मणोने बोलावा, तथा तेमनीपासे श्रीराधिकासहित पुरुषोत्तमदेवनु कळश उपर स्थापनकरावनुं तथा दीपस्थापन करवुं, तथा महिना सुधि जे बने ते नियम लइ पाळवो, हवे तेमा करेला व्रतनुं उद्यापन करवुंज जोइये तेने माटे व्रतमा कहेला दानमार्थी अनुकुळताथी ग्रहणकरवो पछि ते व्रतमा जोइता साहित्यनी टीप आपेली छे तेना प्रमाणे अथवा शक्तीप्रमाणे साहित्य एकठु करवुं, पछी उद्यापनना आगले दिवसे सहवारे वेळा उठी नित्यक्रिया सघळी परवारी, वासुदेवभगवाननु ध्यान धरी नियमग्रहणनो संकल्प करवो. पछी तीर्थे जइ ब्राह्मणने लइने, तथा त्या स्नानविधि करि विधिवत् प्रायश्चित्तप्रयोग करवो. अथवा न बने तो घेर करवो (उद्यापनना आरमने दिवसे करवानो चाल पडी गयोछे) पछी घेर आवी सरस्व उपहारने लइ देवनो मंडप विगेरे सुंदर शोभायुक्त करिने तथा चरणामृत तुळशी तिलक धारण

प्रतिप्रत्तिथि मारभ्य दर्शेचैव समापयेत्॥मासमेकं करिष्यामि व्रतं श्री पुरुषोत्तम ॥ उपवासेन नक्तं वा एक भुक्तं करिष्यति ॥ दीपदानादविछिन्नात् प्रीयतां पुरुषोत्तम ॥ स्नानं दानंजपं पूजां तर्पणं द्विज भोजनं ॥ असिम•

आचमन–प्रथमं यः पिबे दापः ऋग्वेदस्तेन तृप्यति ॥ यद्वितीयं यजुर्वेद तेन प्रीणाति भारत ॥ १ ॥ यत्तृतीयं सामवेदं तेन प्रीणाति पाडव प्रथम पन्मृजेदास्यं दक्षणांगुष्ठ मूलतः ॥ अथर्ववेदं प्रीण्याती तेन राजन्न संशयः ॥ २ ॥ गोविंदार्चन चंद्रिकायां ॥

करीने पाटलापर रातुं आसन पाथरीने कर्त्तीये बेसवुं पछी गोरे यजमानने कपाळे चाल्लो करी, आचमन प्राणायाम करावी यजमानना हाथमां पाणी चंदन फुल फल दक्षिणा लेवाडवा तथा उपर लखेलो मन नीयमनो ते बोलवी पाणी ताम्रपात्रमां मुकवु, पछि प्रकरण पेहेलाना २ पत्रथी शांतिपाठनो आरंभ करीने प्रधान संकल्प पर्यंत कराववो बेमा हाथमां पाणी लइ चदन फुल दक्षणा मुकी केवुंके मारादरेकपापो दूरथवा तथा पुत्रपौत्रादि प्राप्तथवा तथा गोलोक वासीनी प्रीति मेळववा करेला व्रतनु अथवा व्रतधारण करवा उद्यापन करु छउ, ए संकल्प प्राह्मण बोलेछे. तेनो अर्थछे एथया पछी अंगसंकल्प करवो पडेछे ते प्रकरण पेल्लाना२ पत्रथी आरंभी पुण्याहवाचनात प्रयोग करवो, पछी संकल्पना क्रमप्रमाणे कर्म करवुं. हवे प्रधान कर्मना अंगभूत कर्म करवु जोइये ते पुण्याहवाचन पछी. माटे ज्या प्रधान देवनु मंडळ करवु होय त्या ब्रह्मादि देवोनु स्थापन करवा संकल्प करवो, ते थया पछि डावा हाथमा यजमाने चोखा राखी ब्राह्मणो कहे त्या मंत्राते यथाववावोनु ब्राह्मणोये ते देवना स्थान पर सोपारी सुर्णसह मुकवु तेनापर आवो इनरुही स्थापन करावनु, ए प्रमाणे ब्रह्माथी आरंभी वैनायकी पर्यंत देवोनु स्थापन करवु.

न्मासे करिष्यामि तेन पापं व्यपोहतु ॥ सुमुखश्चेत्यादि पठित्वा ॥ **अथ प्रधान संकल्पः** ॥ अद्येत्यादि० देशकालौ संकीर्त्य०मम, आत्मनः, पुराणोक्त फल प्राप्त्यर्थं अस्माकं सकुटुंबानां सपरिवाराणां अशेष पापक्षयार्थं पुत्र पौत्रादि सुखश्री प्राप्त्यर्थं गोलोक दक्षिण पार्श्वस्थ वैकुंठ शिवपुर निवासपूर्वक गोलोकाधिप राधिकादि पुरुषोत्तम पादाब्ज सेवा प्राप्त्यर्थं आचरितस्याचरिष्य माण व्रतस्य संपूर्ण फलप्राप्तये यथा मिलीतोपचारद्रव्यैः यथाशक्ति पुरुषोत्तम मास व्रतोद्यापनाख्यं कर्म करिष्ये ॥ **अथ अंग संकल्पः** ॥ तदङ्गभूतं दिग्रक्षणं, कलशाराधनं, पंचगव्यकरणं, गणपतिपूजनं, गणेश गौर्यादि मातृकाणां स्थापनं; सांकल्पेन विधिना वैश्वदेव पूर्वक सहिरण्य नांदीश्राद्धं अर्घंवंदनं ब्राह्मणवरणं, सांकल्पेन विधिना वरणश्राद्धं, कलशस्थापन पूर्वक स्वस्ति पुण्याहवाचनादीनि करिष्ये ॥ इत्यंगसंकल्प क्रमेण कर्म समाप्य ॥ पुनः साक्षत जलमादाय अद्येत्यादि० अस्मिन् मंडले ब्रह्मादि देवानां स्थापन प्रतिष्ठा पूजा महं करिष्ये ॥ वामहस्ते अक्षतान् गृहीत्वा ॥ **अथ ब्रह्मादि देवता स्थापनं** ॥ **मंडलमध्ये** ॥ एह्येहि सर्वाधिपते सुरेन्द्र मदीय यज्ञे पितृदेवताभिः ॥ सर्वस्यधाता

स्यमित प्रभाव विशलमन्तः सततं शिवाय ॥ १ ॥ ब्रह्मन्निहागच्छ इह तिष्ट ब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि ॥ १ ॥ मंडलादुत्तरे सोमं ॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्र गणेन सार्द्धं ॥ सर्वौषधिः पितृगणेन सार्द्धं गृहाण पूजां भगव न्नमस्ते॥२॥सोम इहागच्छ इहतिष्ट सोमाय नमः सोमं आवाहयामि स्थापयामि ॥२॥ ईशाने खण्डेन्दौ॥एह्येहि यज्ञेश्वरन स्त्रिशूल कपाल खट्वांङ्ग धरावसार्धेम् ॥ लोकेन यज्ञेश्वर यज्ञसिध्यै गृहाण पूजां भगवन्नमस्ते ॥ ३ ॥ ईशान इहागच्छ इहतिष्ट ईशानायनमः ईशानं आवाहयामिस्था० ॥३॥ पूर्वे इन्द्रम्॥ एह्येहि सर्वामरसिद्धसाध्यै रभिष्टुतो वज्रधरामरेश ॥ सविज्यमानो प्सरसांगणेन रक्षाध्वरंनो भगवन्नमस्ते ॥ ४ ॥ इन्द्र इहागच्छ इह तिष्ट इन्द्राय नमः इन्द्रं आ०स्था० ॥ ४ ॥ आग्नेयां खण्डेन्दौ ॥ अग्निम् ॥ एह्येहि सर्वामरहव्य वाह मुनिप्रवीरै रभितोभि गुप्तम्॥ तेजोवलैर्लोकगणेन सार्द्धं ममाध्वरं रक्ष नमोऽस्तुतेऽग्ने॥५॥अग्ने इहागच्छ इहतिष्ट ॥ अग्नये नमः अग्निं आ० स्था० ॥ ५ ॥ दक्षिणे यमं ॥ एह्येहि वैवस्वत धर्मराज सर्वामरै रर्चित धर्ममूर्ते ॥ शुभाशुभानंद शुचामधीश शिवाय नः पाहि मखं नमस्ते ॥ ६ ॥ यम इहागच्छ इहतिष्ट ॥ यमाय नमः यमं आ० स्था० ॥ ६ ॥ नैरृत्यां खण्डेन्दौ निर्ऋतिम् ॥ एह्येहि रक्षो गणनायकत्वं विशाल वैताल पिशाच संघैः

मभाध्वरं पाहि शुभाधिनाथ लोकेश्वरत्वं प्रणमामि नित्यं ॥ ७ ॥ निर्ऋते इहागच्छ इहतिष्ट ॥ निर्ऋतये नमः निर्ऋतिं मावाहयामि० स्था० ॥ ७ ॥ पश्चीमे वरुणं ॥ एह्येहि यज्ञे ममरक्षणाय यादोगणैः सार्धं मपामधीश ॥ झपाधिरुढ त्वमिहप्रभोमणि रत्नप्रभा भास्वर पाशपाणे ॥ ८ ॥ वरुण इहागच्छ इहतिष्ट ॥ वरुणाय नमः वरुण मावाहयामि स्था० ॥ ८ ॥ वायव्यां खण्डेन्दो वायुं ॥ एह्येहि यज्ञे ममरक्षणाय मृगाधिरुढः सहसिद्ध संघैः प्राणाधिपो हव्यभुजः सहाय गृहाणपूजां भगवन्नमस्ते ॥ ९ ॥ वायो इहागच्छ इहतिष्ट वायवे नमः वायुमावाहयामि स्था० ॥ ९ ॥ वायुसोमयोर्मध्ये भद्रे अष्टवसून ॥ एह्येहिवस्वीश महानिधीश रत्नाकरः सर्व सहस्रतेजाः ॥ धनस्वरुपो ममयज्ञपातुं गृहाण पूजां भगवन्नमस्ते ॥ १० भो अष्टवसवः इहागच्छत इहतिष्टत अष्टवसुभ्यो नमः अष्टवसूनावाहयामि स्था० ॥ १० ॥ सोमे शानयोर्मध्ये एकादश रुद्रान् ॥ एह्येहि यज्ञेश्वर भो त्रिशूल कपाल खड्गाङ्ग वरेण सार्द्ध ॥ लोकेन विश्वेश्वर यज्ञसिध्यै गृहाणपूजां भगवन्नमस्तेः ॥ ११ ॥ एकादशरुद्राः इहागच्छत इहतिष्टत एकादशरुद्रेभ्यो नमः एकादशरुद्राना० ॥ ११ ॥ इशानेन्द्रयोर्मध्ये भद्रे द्वादशादित्यान् ॥ एह्येहि पद्मासन पद्मपाणे सुरक्तसिन्दूर समान वर्णं ॥ सप्ताश्वरक्ताम्बर सूर्यशीघ्रं गृहाण पूजां भगवन्नमस्ते ॥ १२ ॥ द्वादशा-

दित्याः इहागच्छत इहतिष्ठत द्वादशादित्येभ्यो नमः द्वादशादित्यानावाहयामि स्था० ॥ १२ ॥ इन्द्राग्न्योर्मध्ये भद्रे अश्विनौ ॥ द्विभुजौ देवभिषजौ कर्तव्यौ देवसंयुतौ ॥ तयो रोषधयः कार्यादिव्या दक्षिणहस्तयोः ॥ १२ ॥ अश्विनौ इहागच्छतम् इह तिष्ठतम् ॥ अश्विभ्यां नमः अश्विनौ आवाहयामि स्था० ॥ १२ ॥ अग्नियमयोर्मध्ये भद्रेःसपैतृकान्विश्वान् देवान् ॥ एह्येहि सर्वामर सिद्धसाध्यै रभिष्टुतो वज्रधरामरेश ॥ संवीज्यमानोप्सरसांगणेन रक्षाध्वरं नो भगवन्नमस्ते॥१४॥सपैतृकाः विश्वदेवाः इहागच्छत इहतिष्ठत सपैतृकविश्वेभ्यो देवेभ्यो० सपैतृकान् विश्वान् देवानावाहयामि स्था० ॥ १४ ॥ यम नैऋत्तयोर्मध्ये भद्रे सप्त यक्षान् ॥ एह्येहि रक्षो गणनायकस्त्वं विशाल वैताल पिशाच संघैः ॥ ममाध्वरंपाहिशिवाधिनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥ १५ ॥ सप्तयक्षाः इहागच्छत इहतिष्ठत ॥ सप्तयक्षेभ्यो नमः सप्तयक्षानावाहयामि स्था० ॥ १५ ॥ निर्ऋतिवरुणयोर्मध्ये भद्रे सर्पान् ॥ एतेतसर्पाः शिवकंठ भूषा लोकोपकाराय भुवं वहन्तः॥जिन्हाद्वयोपेत सुखामदीयां गृह्णीतपूजां सुखदां नमो वः ॥ १५॥ सर्पाः इहागच्छत इह तिष्ठत ॥ सर्पेभ्यो नमः सर्पानावाहयामि स्था० ॥ १६ ॥ वरुणवायवोर्मध्ये भद्रे गन्धर्वाप्सरसः ॥ आवाहयेहं सुरदेवसैन्याः स्वरूपतेजो सुखपद्म भासः ॥ सर्वामरेशैः परिपूर्णकामाः पूजां

गृहीतुं मम यज्ञ भूमौ॥१७॥गन्धर्वाप्सरसः इहागच्छत इहतिष्ठतः गन्धर्वाप्सरोभ्यो नमः गन्धर्वाप्सरसः आवाहयामि स्था० ॥ १७ ॥ ब्रह्मसोमयोर्मध्ये बाणोपरिस्कंदं ॥ एह्येहि देवेश्वरशंभुसूनो शिखिन्द्रगामिन्सुरसिद्ध संघैः ॥ संस्तूयमानात्मशुभायनित्यं गृहाण पूजां भगवन्नमस्ते ॥ १८ ॥ स्कन्द इहागच्छ इहतिष्ट स्कन्दाय नमः स्कन्दमावाहयामि स्था० ॥ १८ ॥ तदुत्तरतः नन्दीश्वरं ॥ एह्येहि देवेन्द्रपिनाकपाणे खण्डेन्दुमौलि प्रियशुभ्र वर्ण ॥ गौरीशयानेश्वर यक्षसिद्धे गृहाण पूजां भगवन्नमस्ते ॥१९॥ नन्दीश्वर इहागच्छ इहतिष्ट नन्दीश्वराय नमः नन्दीश्वरमावाहयामि स्था० ॥ १९ ॥ तदुत्तरतः ॥ शूलमहाकालौ ॥ आयात मायात सुमा प्रियस्य प्रियौमुनीन्द्रादिकसिद्धसेव्यौ ॥ गृह्णीतमेतां ममशूलकालौ पूजां सुसौघं कुरुतं नमोवाम् ॥२०॥ शूलमहाकालौ इहागच्छतं इहतिष्ठतम् ॥ शूलमहाकालाभ्यांनमः शूलमहाकालौ आवाहयामि स्था०॥ २० ॥ ब्रह्मेशानयोर्मध्ये वल्लीषु दक्षादि सप्तकान् ॥ एह्येहि देवालयविश्वमूर्ते चतुर्मुख श्रीधर शंभुमान्य ॥ सुपुस्तकाक्ष स्रुवपात्रपाणे गृहाण पूजां भगवन्नमस्ते ॥ २१ ॥ दक्षादि सप्तकाः इहागच्छत इहतिष्ठत दक्षादिसप्तकेभ्योनमः दक्षादिसप्तकानावाहयामि स्था० ॥ २१ ॥ ब्रह्मेन्द्रयोर्मध्ये वाप्यां (बाणोपरि) दुर्गाम् ॥ एह्ये हि दुर्गे दुरितौघनाशिनि प्रचण्ड

दैत्यौघ विनाशकारिणी ॥ उमे महेशार्द्धे शरीरधारिणी स्थिराभवत्वं मम यज्ञकर्मणि ॥२२॥ दुर्गे इहागच्छ इहतिष्ठ दुर्गायै नमः दुर्गामावाहयामि स्था० ॥ २२॥ तदुत्तरतः ॥ विष्णुं ॥ एह्येहि नीलाम्बुदमेचकत्वं श्रीवत्सवक्षःकमला धिनाथ ॥ सर्वामरैः पूजितपादपद्म गृहाण पूजां भगवन्नमस्ते ॥ २३ ॥ विष्णो इहागच्छ इहतिष्ठ विष्णवेनमः विष्णुमावाहयामि स्था० ॥ २३ ॥ ब्रह्माऽग्न्योर्मध्ये वल्लीषु स्वधाम् ॥ सुखाय पितॄन् कुलवृद्धिकर्त्रीं स्वतोत्पलाभानिहरक्तनेत्रान्॥सुरक्त माल्याम्बरभूषितां श्वनमामि पिठे कुलवृद्धिहेतोः॥२४॥स्वधे इहागच्छ इहतिष्ठ स्वधायै नमः स्वधामावाहयामि स्था०॥२४॥ ब्रह्मयमयोर्मध्ये वाप्यां (बाणोपरि) मृत्युरोगौ ॥ आवाहयाम्यहंरोग मनेकविधलक्षणम्॥नानालंकारसंयुक्तं रक्तश्मश्रु विलोचनम् ॥२५॥ मृत्युरोगौ इहागच्छतम् इहतिष्ठतम्॥मृत्युरोगाभ्यां० मृत्युरोगौ आवाहयामि स्था० ॥ २५ ॥ ब्रह्मनैर्ऋतयोर्मध्ये वल्लीषु ॥ गणपतिं ॥ एह्येहि विघ्नाधिपते सुरेन्द्र ब्रह्मादिदेवैरभिवन्द्यपाद ॥ गजास्य विघ्नालय विश्वमूर्ते गृहाण पूजां भगवन्नमस्ते ॥२६॥ गणपते इहागच्छ इहतिष्ठ गणपतये नमः गणपतिमावाहयामि स्था० ॥ २६ ॥ ब्रह्मवरुणयोर्मध्ये वाप्यां (बाणोपरि) अपः ॥ एह्येहि लोकेश्वर पाशपाणे यादोगणैर्वन्दित पादपद्म ॥ पीठेत्रदेवेश गृहाण पूजां पाहित्वमस्मान् भगवन्न-

मस्ते ॥२७॥ आपः इहागच्छत इहतिष्ठत अद्भ्यो० अपः आवाहयामि स्था० ॥ २७ ॥ ब्रह्मवायवोर्मध्ये वह्निपु
॥ मरुतः ॥ एह्येहि यज्ञेश समीरणत्वं मृगाधिरूढे सहसिद्धसंघैः ॥ प्राणस्वरूपिन्सुखतासहाय गृहाण पूजां
भगवन्नमस्ते ॥२८ ॥ मरुतः इहागच्छत इहतिष्ठत ॥ मरुद्भ्यो० मरुतः आ० ॥ २८ ॥ ब्रह्मणः पादमूले कर्णिकाधः
पृथिवीम् ॥ एह्येहि पातालचराचरेन्द्र नागांगना किंनर गीयमान ॥ यक्षोनगेन्द्रामरलोकसंघैर नन्तरक्षाध्वर-
मस्मदीयम् ॥२९ ॥ पृथिवी इहागच्छ इहतिष्ठ पृथिव्यैनमः पृथिवीमावाहयामि स्था०॥ २९ ॥ तदुत्तरतः गंगादि-
नदीः ॥ एह्येहि गंगे दुरितौघनाशिनि झषाधिरूढे उदकुम्भहस्ते ॥ श्री विष्णुपादाम्बुजसंभवे त्वं पूजां गृहाण
शुभदे नमस्ते ॥ ३० ॥ गंगादिनद्यः इहागच्छत इहतिष्ठत गंगादिनदीभ्योनमः गंगादिनदीः आवाहयामि स्था०
॥ ३० ॥ तदुत्तरतः ॥ सप्तसागरान् ॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरे
न्द्राऽमरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते॥३१॥ सप्तसागराःइहागच्छत इहतिष्ठत सप्तसागरेभ्योनमःसप्तसागर-
नावाहयामि स्था० ॥ ३१ ॥ ततः कर्णिकोपरि ॥ मेरुं ॥ एह्येहि कार्तस्वररूपसर्व भूभृत्पते चन्द्ररवी दधानः ॥
सर्वौषधिस्थान महेन्द्रमित्र लोकत्रयावास नमोस्तु तुभ्यम् ॥३२॥मेरो इहागच्छ इहतिष्ठ मेर वेनमः मेरुमा० ॥३२॥

ततः सोमादि संन्निधौ क्रमेण आयुधान्यावाहयेत ॥ तद्यथा सोमसमीपे ॥ गदां ॥ निषिक्ता कुमुदाक्षस्य नाम्ना कौमोदकी गदा॥ शांतिदा स्मरणादेव तस्यै तुभ्यं नमोनमः॥ गदे इहागच्छ इहतिष्ट ॥२३॥ गदायैनमः गदामावाहयामि स्था० ॥ २३ ॥ ईशान्यां त्रिशूलम् ॥ महायोगीन्द्र हस्तस्थ शंकरस्य प्रियंकरः ॥ त्रिशूलत्वमिहागच्छ पूजेयं प्रतिगृह्यताम् ॥२४॥ त्रिशूल इहागच्छ इहतिष्ट त्रिशूलायनमः त्रिशूलमावाहयामि स्था०॥२४॥ इन्द्रसमीपे ॥वज्रं॥तप्तकाञ्चनवर्णाभं वज्रं वै शक्रनायकम्॥ आवाहयामि यज्ञेस्मिन् गृहाणेमं नमोस्तुते ॥२५॥ वज्र इहागच्छ इहष्ठित वज्रायनमः वज्रमावाहयामि स्थापयामि ॥२५॥अग्निसमीपे शक्तिं॥सर्व दैत्यविनाशाय सर्वकामफलप्रदे॥ सर्वसत्वहितेशक्ते शांति यच्छ नमोस्तुते ॥२६॥ शक्ते इहागच्छ इहतिष्ठ शक्तयेनमः शक्तिमावाहयामि स्था०॥२६॥ यमसमीपे दण्डम्॥ धर्मराजस्य हस्तस्य यमस्य च सदाप्रियः॥ दण्डायुधनमस्तेस्तु सर्वसिद्धिप्रदोभव ॥२७॥ दण्ड इहागच्छ इहतिष्ठदण्डायनमः दण्डमावाहयामि स्थापयामि० ॥ २७ ॥ निर्ऋति समीपे खड्गम् ॥ नीलजीमूतवर्णलं तीक्ष्णदंष्ट्र कृशोदर॥ खड्गराजनमस्तुभ्यं पूजेयं प्रतिगृह्यताम् ॥२८॥ खड्ग इहागच्छ इहतिष्ठ खड्गायनमः खड्गमावाहयामि स्था० ॥२८॥ वरुण समीपे पाशम् ॥ देवासिवरुणास्त्रत्वं दैत्यवंश विदारण॥ पाशमां समरे रक्ष

रज्जुराज नमोस्तुते ॥३९॥ पाश इहागच्छ इहतिष्ठ पाशायनमः पाशमावाहयामि स्था० ॥ ३९ ॥ वायुसमीपे अंकुशं ॥ गजघ्नं परवीरघ्नं परसैन्यापहारकम् ॥ गणेशस्य प्रियंनित्यमंकुशायनमोनमः ॥ ४० ॥ अंकुश इहागच्छ इहतिष्ठ ॥ अंकुशायनमः अंकुशमावाहयामि स्था० ॥ ४० ॥ तद्बाह्ये ॥ गौतमादीन् ॥ उत्तरे गौतमम् ॥ गौतमः सर्वभूताना मृषीणां च सदाप्रियः ॥ श्रौतानां कर्मणां, चैव संप्रदाय प्रवर्त्तकः ॥४१॥ गौतम इहागच्छ इहतिष्ठ गौतमायनमः गौतममावाहयामि स्था० ॥ ४१ ॥ ईशाने ॥ भरद्वाजं ॥ भरद्वाजनमस्तेस्तु सदाध्ययन तत्पर ॥ आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यताम् ॥४२॥ भरद्वाज इहागच्छ इहतिष्ठ भरद्वाजायनमः भरद्वाज मावाहयामि स्था० ॥ ४२ ॥ पूर्वे ॥ विश्वामित्रम् ॥ विश्वामित्र नमस्तुभ्यं ज्वलदग्नि समप्रभा ॥ अध्यक्षी कृत गायत्री तपोरूपेण संस्थितः ॥ ४३ ॥ विश्वामित्र इहागच्छ इहतिष्ठ विश्वामित्रायनमः विश्वामित्रमावाहयामि स्था० ॥ ४३ ॥ आग्नेय्याम् ॥ कश्यपम् ॥ कश्यपः सर्वलोकाढ्यः सर्वभूत दयाकरः ॥ असित्वां प्रार्थयामीश पूजेयं प्रतिगृह्यताम् ॥४४॥ कश्यप इहागच्छ इहतिष्ठ कश्यपायनमः ॥ कश्यपमावाहयामि स्था०॥ ४४ ॥ दक्षिणे जमदग्निम् ॥ जमदग्निर्महातेजा स्तपसा ज्वलतीहतम् ॥ आवाहयामि यज्ञेतत्पूजेयं प्रतिगृह्यताम् ॥ ४५ ॥ जमदग्ने

इहागच्छ इहतिष्ठ जमदग्नयेनमः जमदग्निमावाहयामि स्था० ॥ ४५ ॥ नैर्ऋत्याम् ॥ वसिष्ठम् ॥ नमस्तुभ्यं व-सिष्ठाय कर्मकर्त्रेमहामुने ॥ धर्मरूपाय महते लोकानां हितकारिणे ॥४६॥वसिष्ठ इहागच्छ इहतिष्ठ वसिष्ठायनमः वसिष्ठमावाहयामि स्था० ॥ ४६ ॥ पश्चिमे ॥ अत्रिं ॥ अत्रये तु नमस्तुभ्यं सर्वलोक हितैषिणे ॥ तपोरूपाय सत्याय ब्रह्मणे मित तेजसे ॥ ४७॥ अत्रे इहागच्छ इहतिष्ठ अत्रयेनमः अत्रिमावाहयामि स्था० ॥ ४७ ॥ वाय-व्याम् ॥ अरुन्धतीम् ॥ अरुन्धत्यै नमस्तुभ्यं सर्वसौख्य प्रदायिनि ॥ एहिमण्डलमध्येते नमः पूजां गृहाणमे ॥ ॥४८॥ अरुन्धती इहागच्छ इहतिष्ठ अरुन्धत्यैनमः अरुन्धतीमावाहयामि स्था० ॥ ४८ ॥ तद्बाह्ये पूर्वादारभ्यै न्द्र्यादीन् ॥ पूर्वे ॥ ऐन्द्रीम् ॥ इन्द्राणीं गजकुंभस्थां सहस्र नयनोज्वलाम् ॥ नमामि वरदां देवीं सर्व देवैर्नम-स्कृताम् ॥४९॥ ऐन्द्रि इहागच्छ इहतिष्ठ ऐन्द्र्यैनमः ॥ ऐन्द्रीमावाहयामि स्था० ॥४९॥ आग्नेयाम् ॥ कौमारीम् ॥ एह्येहि कौमारिविधेहि शान्तिं शक्तिं दधानेपिसदासिमध्ये ॥ स्कन्धाधिरूढे शिखिपुंगवाभ्यां मातः प्रसाद प्र-सृतिं प्रयच्छ ॥५०॥ कौमारि इहागच्छ इहतिष्ठ कौमार्यैनमः कौमारीमावाहयामि स्था० ॥५०॥ दक्षिणे ब्राह्मीम् ॥ चतुर्मुखीं जगद्धात्रीं हंसारूढांवरप्रदाम् ॥ सृष्टिरूपां महाभागां ब्रह्माणीं तां नमाम्यहम् ॥ ५१ ॥ ब्राह्मि इहागच्छ

इहतिष्ठ ॥ ब्राह्म्यैनमः ब्राह्मीमावाहयामि स्था० ॥ ५१ ॥ नैर्ऋत्याम् ॥ वाराहीम् ॥ वाराहरूपिणीं देवीं दंष्ट्रोद्धृत वसुन्धराम् ॥ शुभदां पीतवसनां वाराहीं तां नमाम्यहम् ॥५२॥ वाराहि इहागच्छ इहतिष्ठ वाराह्यैनमः वाराहीमावाहयामि स्था० ॥ ५२ ॥ पश्चिमे चामुण्डाम् ॥ चामुण्डा मुण्डमथनां मुण्डमालोपशोभिताम् ॥ अट्टाट्टहासमुदितां नमाम्यात्म विभूतये ॥ ५३ ॥ चामुण्डे इहागच्छ इहातिष्ठ चामुण्डायैनमः चामुण्डामावाहयामि स्था० ॥ ५३ ॥ वायव्यां वैष्णवीम् ॥ शंखचक्रगदापद्म धारिणीं कृष्णरूपिणीम् ॥ स्थितिरूपां खगेन्द्रस्थां वैष्णवीं तां नमाम्यहम् ॥५४॥ वैष्णवि इहागच्छ इहतिष्ठ वैष्णव्यैनमः वैष्णवीमावाहयामि स्था०॥५४॥उत्तरे ॥ माहेश्वरीम् ॥ माहेश्वरीं नमाम्यद्य सृष्टिसंहार कारिणीम्॥वृषारूढां शुभां शुभ्रां त्रिनेत्रांवरदां शिवाम् ॥५५॥ माहेश्वरि इहागच्छ इहतिष्ठ माहेश्वर्यैनमः माहेश्वरीमावाहयामि स्था० ॥ ५५ ॥ ईशाने ॥ वैनायकीम् ॥ चतुर्भुजां त्रिनेत्रां च सर्वाभरणभूषिताम् ॥ आवाहयामि देवेशीं पूजेयं प्रतिगृह्यताम् ॥५६॥ वैनायकि इहागच्छ इहतिष्ठ वैनायक्यैनमः वैनायकीमावाहयामि स्था० ॥ ५६ ॥ हस्ते अक्षतान् गृहीत्वा ॥ मंत्रः ॥ प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता ॥ प्रतिष्ठां वः करोम्यत्र मंडले देवतैः सह ॥ ब्रह्माद्यावाहितदेवाः सांगाः सपरिवाराः सुप्रतिष्ठिताः वरदा

भवत ब्रह्माद्यावाहितदेवेभ्योनमः आवाहनं समर्पयामि० ॥ ब्रह्माद्या०आसनं स० ॥ ब्रह्माद्या०पादयोः पाद्यं स० ॥ ब्रह्माद्या० हस्तयोः अर्घ्यं स० ब्रह्माद्या० आचमनीयं स० ॥ ब्रह्माद्या० स्नानं स० ब्रह्माद्या० वस्त्रं स० ब्रह्माद्या० यज्ञोपवितं स० ब्रह्माद्या० चंदनं स० ब्रह्माद्या० अलंकरणार्थे अक्षतान् स० ब्रह्माद्या० पुष्पं स० ब्रह्माद्या० धूपं स० ब्रह्माद्या० दीपं स० ब्रह्माद्या० नैवेद्यं स० ब्रह्माद्या० तांबूलं स० साद्गुण्यार्थे दक्षिणां स० ब्रह्माद्या० प्रदक्षिणां स० ब्रह्माद्या० पुष्पांजलीं स० ॥ अनेन पूजनेन ब्रह्माद्याः प्रीयंतां नमम ॥ स्वाग्रे धान्य राशिं कुर्यात् ॥ तदुपरि रौप्यमयान्वा ताम्रमया न्यथाविधिनाकलशान्संस्थाप्य तेषु जलादिनि उक्तपदार्थादीनि विधिना निक्षिपेत् ॥ तद्यथा ॥ विश्वाधारासीती मंत्रेण भूमिं स्पृष्ट्वा ॥ विश्वाधारासि धरणी शेषनागोपरि स्थिता ॥ उद्धृतासिवराहेणकृष्णेन शतबाहुना ॥ भूम्यै नमः ॥ हेमरोप्यादि मंत्रेण कलशस्थापनं ॥

अर्थ–उपर लख्याप्रमाणे ब्रह्मादीनुं आवाहन स्थापन थया पछी, जयमा हाथमां चोखा लईने प्रतिष्ठानो मंत्र ब्राह्मणोए पछी सर्वा स्थापन करेला देवताओपर चोखा नखावी केहेवुं (प्रतिष्ट एटले स्थिरथहो. पछी ब्रह्माद्यावाहित देवेभ्योनमः एवो उद्द छइ षोडशोपचारे अथवा पंचोपचारे पूजा करवी. ब्रह्मादीनुं पूजन थया पछी जे कलशो लाव्या होय तेनुं तेना मंत्रो भणी विधिवत् स्थापन करवुं.

हेमरौप्यादि संभूतं ताम्रजं सुदृढं नवं ॥ कलशं धौतकल्माषं छिद्रवर्ण विवर्जितं ॥ सूत्रंकार्पासेति मंत्रेण रक्त सूत्र वेष्टनं ॥ सूतंकार्पास संभूतं ब्रह्मणा निर्मितं पुरा ॥ येनबद्धं जगत्सर्वं वेष्टनं कलशस्य च ॥ जीवनं सर्वेति मंत्रेणजलपूरणं ॥ जीवनं सर्वजीवानां पावनं पवनात्मकं ॥ बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम् ॥ देवेभ्यः इतिमंत्रेण सर्वौषधी चंदनं च प्रक्षिप्य ॥ देवेभ्यः पूर्वतोजाता देवेभ्यः स्त्रियुगं पुरा ॥ शतं तनू च या वभ्रू जीवनं जिस्नाय च ॥ दूर्वे ह्यमृत इति मंत्रेण दुर्वां ॥ दूर्वे ह्यमृतसंपन्ने शतमूले शतांकुरे ॥ शतं पातकसंहर्त्री शतमायुष्य वर्द्धिनी ॥ विविधं पुष्पेति मंत्रेण पंचपल्लवान् ॥ पुष्पं च ॥ अश्वत्थोदुंबर प्लक्ष न्यूतन्यग्रोध पल्लवाः ॥ पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः ॥ विविधं पुष्पसंजातं देवानां प्रीतिवर्द्धनं ॥ क्षिप्तं यत्कार्यसंभूतं कलशे प्रक्षिपाम्यहम् ॥ धान्यौषधीति मंत्रेण धान्यं ॥ धान्यौषधी मनुष्याणां जीवनं परमं स्मृतं ॥ क्षिप्तं यत्कार्यसंभूतं कलशे प्रक्षिपाम्यहम् ॥ पूगीफलेति मंत्रेण पूगीफलं ॥ पूगीफलमिदं दिव्यं पवित्रं पापनाशनं ॥ पुत्रपौत्रादि फलदं कलशे प्रक्षिपाम्यहम् ॥ हिरण्यगर्भेति हिरण्यं ॥ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ॥ अनंत पुण्य फलदमतः शांति प्रयच्छ मे ॥ अश्वस्थानादिति मंत्रेण सप्तमृत्तिका निक्षिपेत् ॥ अश्वस्थाना द्गजस्थाना द्वल्मीका

त्संगमा हृदात् ॥ राजद्वारा च गो गोष्ठा न्मृदमानीय निक्षिपेत् ॥ कनकं कुलिशेति मंत्रेण पंचरत्नं वा सुवर्णं वा यथाशक्ति रौप्यं निक्षिपेत ॥ कनकं कुलिशं नीलं पद्मरागंच मौक्तिकं ॥ एतानि पंचरत्नानी कलशे प्रक्षिपाम्यहम् ॥ पिधानं सर्वेति मंत्रेण धान्यसहित पूर्णपात्रं ॥ पिधानं सर्व वस्तूनां सर्वं कार्यार्थ साधनं ॥ संपूर्ण कलशो येन पात्रं तत्कलशोपरि ॥ इति मंत्रेण पूर्णपात्रं निधाय ॥ मंडलमध्ये ॥ **प्रधान कलशं** ॥ चतुर्दिक्षुचतु र्व्यूह कलशान् संस्थाप्य ॥ तदुपरि क्षौमवस्त्रं प्रसार्य तदुपरि यंत्रं निधाय ॥ ततः मंडलपरितः त्रिंशद्कुंभान् संस्थाप्य ॥ ततो मूर्तिनां ॥ **अग्न्युत्तारणं कुर्यात्** ॥ ततः सुवर्णमयी मूर्तीनां ताम्रपात्रे

अर्थ—पूर्णपात्रसुधीनुं कलशस्थापन थया पछी मंडलना मध्यमां प्रधाननो कलश मुकवो तथा चार दिशाए व्युह कलश गोठवा,तथा तेमना उपर रेशमी कपडाओ पाथरवा, पछी मंडलनी चारे बाजुये (३०) त्रीस घडाओ मुकवा तथा तेनाउपर यंत्र मुकवा. पछी राधापुरुषोत्तमनी तथा चारव्युहनी तथा त्रीस बीजा देवताओनी मुरतीओ एक पात्रमां मुकवी तेथा तेनाउपर गायनुं दुध दहिं घी छाण मुतर तथा दर्भ विगेरे मुकी अग्न्युत्तारण पूर्वक प्राणप्रतिष्ठा करवी तेमां पहेला संकल्प करवो के अमुक दोषो दूरकरवा प्राणप्रतिष्ठा करुं. छउं पछी मुर्तीपर पाणीनीधार पाड्याकरवी ब्राह्मणभणेत्यां सुधी पछी ब्राह्मणना हाथमां ते पात्र आपी तेनीपासे प्राणप्रतिष्ठा करावबी प्राणप्रतिष्ठा थया पछी स्नानकरावबुं.

स्थापनं कृत्वा ॥ अग्न्युत्तारण पूर्वकप्राणप्रतिष्ठां कुर्यात् ॥ अद्येत्यादि० आसांमूर्ती नां अंग प्रत्यंग सन्धिसमु-त्पन्न कुद्दालकादिटंकाघातपाभि संयोग जनित दोष परिहारार्थं अग्न्युत्तारण पूर्वकं ब्राह्मणद्वारा प्राणप्रतिष्ठां क-रिष्ये ॥ मूर्तिं घृतेनाभ्यज्य ॥ उपरि जलधारां कुर्यात् ॥ मंत्रः ॥ अग्निर्वैश्वानरोवन्हि वीतिहोत्रो धनंजयः ॥ अग्न्युत्तारणार्थाय मूर्तीनां शुद्धि हेतवे ॥ त्रिवारं पठेत् ॥ रक्तांभोधिस्थपोतो ल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं कोदंडमिक्षुद्भवमथगुणमप्यंकुशंपंचबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनविलसत् पीनवक्षो रुहाढ्या देवीबा-लार्कवर्णा भवतु सुखकरी प्राणशक्तिःपरानः ॥ इति मंत्रेणाग्न्युत्तारणं ॥ ततः प्राणप्रतिष्ठां कुर्यात ॥ अस्यश्री प्राणप्रतिष्ठमंत्रस्य ब्रह्मा विष्णु महेश्वराऋषय. ऋग्यजुः सामानि छंदांसि जगत्सृष्टिकारिणी प्राणशक्ति देवता ॥ आं बीजं ऱ्हीं शक्तिः क्रों किलकं आसां मूर्तिनां प्राणप्रतिष्ठापने विनियोगः॥ मूर्तिषु हस्तं निधाय ॥ पठेत॥ आं ऱ्हीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं ॥ आसां मूर्तीनां प्राणा इह प्राणाः ॥ पुनः आं ऱ्हीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं ॥ आसां मूर्तीनां जीव इह स्थितः ॥ पुनः आं ऱ्हीं क्रों यं रं लं वं शं षं सं हं ळं क्षं हंसः सोहं ॥ आसां मूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वा घ्राण पाणि पाद पायूपस्थानि इहै-

वागत्य सुखं चिरं तिष्ठन्तु नमः ॥ गर्भाधानादि षोडश संस्कारसिध्यर्थं शोडषप्रणवावृत्तिं करिष्ये ॥ ह्रीं इति षोडशवारं उच्चरेत् ॥ अनेन षोडशसंस्काराःसंपद्यंताम् तत्॥मूर्तिं पात्रं कलशोपरिस्थापइत्वा ॥ परिवार देवताना वाहयेत् ॥ हस्ते अक्षतान् गृहीत्वा ॥ मंडुकायनमः ॥ कालाग्निरुद्रायनमः ॥ आधारशक्त्यैनमः ॥ कूर्मायनमः ॥ अनंतायनमः ॥ मूलप्रकृत्यैनमः ॥ पृथिव्यैनमः ॥ श्वेताद्वीपायनमः ॥ कल्पवृक्षायनमः ॥ रत्नमण्डपायनमः ॥ सिंहासनायनमः ॥ इति मध्ये ॥ आग्नादि दिक्षु ॥ धर्मायनमः ॥ ज्ञानायनमः ॥ वैराग्याय नमः ॥ ऐश्वर्यायनमः ॥ आग्नेयादिकोणेषु ॥ अधर्मायनमः ॥ अज्ञानायनमः॥अवैराग्यायनमः॥अनैश्वर्यायनमः॥ मध्ये ॥ आत्मनेनमः ॥ अंतरात्मनेनमः ॥ परमात्मनेनमः॥ज्ञानात्मनेनमः ॥ अग्निमंडलायनमः ॥ सोममंडलाय नमः ॥ संसत्वायनमः ॥ रंरजसेनमः ॥ तंतमसेनमः ॥ सर्वशक्तिकमलासनायनमः ॥ मंडुकाद्यावाहित देवताः सुप्रतिष्टताः वरदाः भवत ॥ मंडुकाद्यावाहितानाम् लभोपहारैर्वा पंचोपचारैः पूजनं ॥पुन र्हस्ते अक्षतान् गृहीत्वा

पछी ते मुर्तिओ तेमना स्थानोपर मुकावीदेवी पछी प्रधान देवनो यन्त्र करवी पीठपर मुकवो तथा तेमना परिवार देवताओनुं स्थापन करवुं. तेनाउपर षोडशा यथाव्या करवा. पछी मंडुकादीनुं पुजन थया पछी यथावकाश बीजा देवतासहित राधापुरुषोत्तमनुं तेमनी जगाउपर स्थापन करवुं.

॥ **मध्ये** ॥ राधिका सहित पुरुषोत्तमायनमः ॥ राधिकासहित पुरुषोत्तममावाहयामि स्था० ॥ तत **श्चतुर्दिक्षु** ॥ कलशेषु ॥ पूर्वे ॥ वासुदेवायनमः वासुदेवमावाहयामि स्था० ॥ दक्षिणे हलधरायनमः हलधरमा- वाहयामि स्था० पश्चिमे ॥ प्रद्युम्नायनमः प्रद्युम्नमावाहयामि स्था० ॥उत्तरे ॥अनिरुद्धायनमः अनिरुद्धमावाहयामि स्था० ॥ ततःत्रिंशत् **कुंभोपरि** मुर्ति वा नालिकेरं, निधाय ॥तदुपरि पूर्वादि क्रमेण देवानावाहयेत् ॥ जिष्ण- वेनमः जिष्णुमा० ॥ १ ॥ विष्णवेनमः विष्णुमा० ॥ २ ॥ महाविष्णवे नमः महाविष्णुमा० ॥ ३ ॥ हरयेनमः हरिमा० ॥ ४ ॥ कृष्णायनमः कृष्णमा० ॥ ५ ॥ अधोक्षजायनमः अधोक्षजमा० ॥ ६ ॥ केशवायनमः केशवमा० ॥ ७ ॥ माधवायनमः माधवमा० ॥ ८ ॥ रामायनमः राममा० ॥ ९ ॥ अच्युतायनमः अच्युतमा० ॥ १० ॥ पुरुषोत्तमायनमः पुरुषोत्तममा०॥ ११ ॥ गोविंदायनमः गोविंदमा०॥ १२ ॥ वामनायनमः वामनमा० ॥ १३ ॥ श्रीशायनमः श्रीशमा०॥१४॥श्रीकण्ठायनमः श्रीकण्ठमा०॥१५॥विश्वसाक्षिणेनमःविश्वसाक्षिणमा०॥१६॥नाराय- णायनमः नारायणमा०॥१७॥मधुरिपवेनमःमधुरिपुमा०॥१८॥अनिरुद्धायनमःअनिरुद्धमा॥१९॥त्रिविक्रमायनमः त्रिविक्रममा० ॥२०॥ वासुदेवायनमःवासुदेवमा०॥२१॥जगद्योनयेनमः॥जगद्योनिमा०॥२२॥शेषतल्पगतायनमः

शेषतल्पगतमा० ॥ २३ ॥ संकर्षणायनमः संकर्षणमा० ॥ २४ ॥ प्रद्युम्नायनमः प्रद्युम्नमा० ॥ २५ ॥ दैत्यारयेनमः दैत्यारिमा० ॥ २६ ॥ विश्वतोमुखायनमः विश्वतोमुखमा० ॥ २७ ॥ जनार्दनायनमः जनार्दनमा० ॥ २८ ॥ धराधारायनमः धराधारमा० ॥ २९ ॥ श्रीधरायनमः श्रीधरमा० ॥ ३० ॥ एवंदेवान् कुंभोपरि आवाह्य ॥ प्रतिष्ठा सर्वदेवानां मित्रा वरुण निर्मिता ॥ प्रतिष्ठां तां करोम्यत्र मंडले देवतैः सह ॥ श्रीराधिकासहित पुरुषोत्तमाद्यावाहित देवाः सुप्रतिष्ठिताः वरदाःभवतः ॥ प्रतिष्ठान्ते इदमंत्रचंदनं च पुष्पं ॥ श्रीराधिकासहित पुरुषोत्तमाद्यावाहितदेवेभ्यो नमः ॥ गंधंसमर्पयामि ॥ पुष्पं० धूपं० दीपं० नैवेद्यं ॥ पंचोपचारैः वा यथाशक्ति पूजनं कृत्वा ॥ पूर्ववृता ब्राह्मणाश्चतुर्व्यूहजप विष्णुसहस्रनाम पुरुषोत्तमसहस्रनामभिः जपंचकुर्युः ॥ ततो शोडशोपचारैः पूजनमारभेत् ॥ हस्ते पुष्पं गृहीत्वा ॥ ध्यायेत ॥ श्रीवत्स वक्षसं शांतं नीलोत्पल

ए प्रमाणे मधानुं स्थापन थया पछी तेमनी प्रतिष्ठा करी पेंठाथी पंचोपचारवडे पूजा करवी पछी पाठकरनारा तथा जपकरनाराओने ते तेमनुं काम सोंपवुं, पछी भगवानना ध्यानथी आरंभी राजोपचार अथवा अनकार प्रमाणे पूजानो आरंभ करवो, तथा प्रथम भगवाननुं ध्यान करी अवाहनोपचार करी मंत्रभगी आसन आपवुं.

दलच्छवीं॥ त्रिभंगललितं ध्यायेत् सराधा पुरुषोत्तमम् ॥१॥ अन्तर्ज्योतिरनन्तरत्नरचिते सिंहासने संस्थितम्॥ वंसीनाद विमोहिते व्रजवधू वृन्दावनेसुंदरं ॥ ध्यायेद्राधिकया सुकौस्तुभमणि प्रद्योतितोरस्थलं राजद्रत्नकिरीटकुण्डलधरं प्रत्यग्रपीताम्बरम् ॥ आगच्छदेव देवेश श्रीकृष्ण पुरुषोत्तम ॥ राधयासहितश्चात्र गृहाण पूजनं मम ॥ विष्णोस्वकीयसदनात् सहसिंधुपुत्र्याः साधंगणैः सुरगणैः परितस्तुवन्हिः ॥ आवाहयामि हृदिपूजयितुं प्रभोत्वां तद्विश्वनाथ करुणा वरुणालयेही ॥ श्रीराधिकासहित पुरुषोत्तमा यनमः ॥ आवाहनोपचारार्थे अक्षतान् समर्पयामि ॥ आसनं ॥ माणिक्य मौक्तिक सुविद्रुमपत्रपुष्पैर्हरिन्द्र नीलमणिमेदककेतु रत्नैः ॥ आधार शक्ति कमलासन कूर्ममूर्ते दिव्यासनं विरचितं च गृहाण विष्णो ॥ नानारत्नसमायुक्तं कार्तस्वर विभूषितम् ॥ आसनं देवदेवेश गृहाण पुरुषोत्तम ॥ श्रीराधिकासहित पुरुषोत्तमायनमः ॥ आसने अक्षतान् समर्पयामि ॥ हस्तेजलमादाय मासोत्तमेमासे० श्रीपुरुषोत्तम पूजन कर्माधिकारार्थं तिलक तुलसी धारण पूर्वक शंखघण्टा पूजनं च करिष्ये ॥ तत्रादौ **तिलकधारणविधिः** ॥ तिलकधारणार्थं यथोक्त मृत्तिकामादाय ॥ वामहस्ते गृहीत्वा ॥ तस्योपरि जलं निक्षिपेत् ॥ श्री किरीट केयूरहार मकरकुण्डल चक्रशंख गदापद्म हस्तपीतांबरधर श्रीवत्सांकित

वक्षस्थल श्रीभूमीसहित स्वात्मज्योतिर्दीपिकाय सहस्रादित्यतेजसे नमोनमः ॥ नारायणायइत्यभिमंत्र्य ॥ जलशायिने नमः ॥ इतिजलं निक्षिप्य ॥ मधुरिपवे नमः ॥ इति संमर्द्य नमो भगवते वासुदेवाय नमः ॥ इति मंत्रेण द्वादशस्थानेषु धारयेत् ॥ यथा ॥ ललाटे केशवायनमः ॥ उदरे नारायणायनमः ॥ वक्षस्थले माधवाय नमः ॥ कंठकूपके गोविन्दायनमः ॥ दक्षिणकुक्षौ विष्णवेनमः ॥ बाहौ मधुसूदनायनमः ॥ कंधरे त्रिविक्रमाय नमः ॥ वामपार्श्वे वामनायनमः ॥ वामबाहौ श्रीधरायनमः ॥ कंधरे हृषीकेशायनमः ॥ पृष्ठे पद्मनाभायनमः ॥ कट्यां दामोदरायनमः ॥ एवंकृत्वा हस्तौ प्रक्षाल्य ॥ तत्तोयं वासुदेवाय नमः ॥ इति मंत्रेण मूर्ध्नि निक्षिपेत् ॥ इति तिलक धारणं ॥ **अथ माला धारणं** ॥ मालां गृहीत्वा ॥ पात्रे निधाय ॥ तदुपरि देवं आवाहयेत् ॥ हस्ते अक्षतान् गृहीत्वा ॥ प्रतिष्ठां कुर्यात् ॥ सर्वशक्ति स्वरूपिणी सिद्धिदात्री इहागच्छ इहतिष्ठ ॥ पूजयेत् ॥

अनामिका कामदोक्ता मध्यमायुष्करी भवेत् ॥ अंगुष्ठः पुष्टिदः प्रोक्तस्तर्जनी मोक्षसाधनी ॥ इति पाद्मे ॥ श्रीरंगे वेंकटाद्रौ च श्रीकूर्मे द्वारके शुभे ॥ प्रयागे नारसिंहाद्रौ वाराहे तुलसीवने ॥ गृहीत्वा मृत्तिकां भक्त्या विष्णुपादजलैः सह ॥ धृत्वा पुण्ड्राणि चांगेषु विष्णुसायुज्य मामुयात् ॥ इति पाद्मोत्तरखण्डे ॥ श्यामं शांतिकरं प्रोक्तं रक्त वश्यकरं तथा ॥ श्रीकरं पीतमित्याहुः श्वेत मोक्षप्रदं शुभम् ॥ आरभ्यनासिका-मूलं ललाटान्तं लिखेन्मृदम् ॥ नासिकायास्त्रयो भागा नासामूलं प्रचक्षते ॥ समारभ्य भ्रुवोर्मूलमन्तरालं प्रकल्पयेत् ॥ दशांगुलप्रमाणन्तु उत्तमो-

यायेच तुलसीमालां रामां कमललोचनां ॥ प्रसन्नां पद्मवदनां वराभय चतुर्भुजां ॥ भगवत्प्रसादिकायै नमः ॥
इति मंत्रेण यथाशक्त्या पूजयेत ॥ पूजान्ते संप्रार्थ्य धारयेत ॥ सौभाग्यं संततिं देहि धनं धान्यं चमे सदा ॥
आरोग्यं शोकशमनं कुरु मे माधवप्रिये ॥ अभिष्ट फलसिद्धिं च सदादेहि हरिप्रिये ॥ देवैस्त्वं निर्मितापूर्व
मर्चितासि मुनीश्वरैः ॥ इति मालां संप्रार्थ्य ॥ ह्रीं सिद्धिदायिन्यै नमः ॥ इति मंत्रेण हस्ते गृहीत्वा ॥
महा माले महामाये सर्वशक्ति स्वरूपिणी ॥ चतुर्वर्ग स्त्वयि न्यस्तस्तस्मा न्मे सिद्धिदा भव॥ ह्रीं नमो-
भगवते वासुदेवायनमः ॥ इतिमंत्रेण कंठे धारयेत इति माला धारण विधिः ॥ **अथ शंखघंटा पूजनं** ॥
समुच्यते ॥ नवांगुलं मध्यमं स्यादष्टांगुलमधः परं ॥ एतैरंगुलिभेदैस्तु कारयेन्न नखैः स्पृशेत् ॥ नासादिकेशपर्यंतं ऊर्ध्वपुण्ड्रं सुशोभनं ॥
मध्ये छिद्रसमायुक्तं तद्विद्याद्धरिमंदिरम् ॥ वामपार्श्वस्थितो ब्रह्मा दक्षिणे तु सदाशिवः ॥ मध्ये विष्णुं विजानीयात् तस्मान्मध्यं न लेपयेत् ॥
अस्नातो यः क्रिया कुर्यादशुचिः पापसंयुतः ॥ गोपीचंदनसंपर्कात् पूतो भवति तत्क्षणात् ॥ अशुचिर्वाप्यनाचारो महापापं समाचरेत् ॥
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रांकितो नरः ॥ धात्रीफलकृता माला तुलसीकाष्ठसंभवा ॥ दृश्यते यस्य देहे तु स वै भागवतो नरः ॥

अर्थ—हवे भगवाननी पूजा करवा योग्य थवा तिलक तुलसीमाळा धारण करवा तेनो संकल्पकरी पूजन करी कहेले स्थाने धारण करवा. पाछे ए प्रकारनो
माळानो विधि थयापछी भगवानने स्नान वीगेरेना कार्यमां मरायात एवा जे शंख घंटा तेमनुं विधिवत पूजन करी. ते तेमनां जगापर स्थापन करवा.

स्वस्य वामभागे पुरस्तात् त्र्यस्रं त्रिकोणं मण्डलमुल्लिख्य ॥ तस्मिन्मंडले ह्रीं आधारशक्त्यै नमः ॥ इति मंत्रेण शंखाधारत्रिपादिकाः स्थापयेत् ॥ ततः ॥ ह्रीं अस्त्रायफट् इतिमंत्रेण क्षालितं ह्रीं आधार शक्त्यै नमः ॥ इत्यनेन त्रिपादिकोपरि शंखं स्थापयेत् ॥ ततः ह्रीं हृदयाय नमः ॥ इत्यनेन शंखमध्ये गंधपुष्पादि क्षिपेत् ॥ ततो दक्षिणहस्तेन शंखं स्पृष्ट्वा ॥ व्युत्क्रांतैर्मातृकाक्षरे न्यासं कुर्यात् ॥ यथा ॥ क्षं हं सं पं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अः ॥ ततः ह्रीं शिरसेस्वाहा ॥ इति मंत्रेण शंखं जलेन पूरयेत् ॥ ततो मंवन्हि-मंडलाय दशकलात्मने नमः इति मंत्रेण शंखाधार त्रिपादिकायां गंधादिना पूजयेत ॥ ततः अंअर्कमंडलाय द्वादशकलात्मने नमः ॥ इति शंखपूजा ॥ ततः ॥ ह्रीं सोममंडलाय षोडशकलात्मने नमः ॥ इति जले पुष्पादि क्षिपेत् ॥ ततः ह्रीं गंगेच यमुनेचैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ इत्यनेनाङ्कुशमु-

ये कंठलग्नतुलसीनलिनाक्षमाला ये वा ललाटपटके लसदूर्ध्व पुण्ड्राः ॥ ये बाहुमूलपरिचिन्हितशंखचक्रास्ते वैष्णवा भुवनमाशु पवित्रयंति ॥ भुजगमपि चिन्हैरंकितं यस्य विष्णोः परमपुरुषनाम्नां कीर्तनं यस्य वाचि ॥ ऋजुतरमपि पुंड्रं मस्तके यस्य कंठे सरसिजमणिमाला यस्य तस्यास्मि दासः ॥

दया सूर्यमंडला त्तीर्थमावाह्य ॥ ततो निजहृत्पद्मात्परमात्मानं इहागच्छेत्यावाह्य ॥ ततः ह्रीं शिखायै वौषडिति गालिनीमुद्रां प्रदर्शयेत ॥ ततस्तज्जलं ह्रीं नेत्राभ्यां वौषडित्यनेन वीक्षयेत ॥ ततः ह्री कवचाय हुं इतिअवगुंठन मुद्रयावगुंठयेत् ॥ ततः षडंगन्यासं कुर्यात् ॥ यथा ॥ क्लीं हृदयाय नमः ॥ कृष्णाय शिरसे स्वाहा ॥ गोविन्दाय शिखायै वौषट् ॥ गोपीजनाय कवचाय हुं ॥ वल्लभाय नेत्रत्रयाय वौषट् ॥ स्वाहा अस्त्रायफट् ॥ इति स्व स्व संप्रदायानु सारेण ज्ञातव्यम् ॥ ततः ऱ्हीं अस्त्राय फट् ॥ इति दिग्बंधनं कृत्वा ॥ तदनंतरं शंखे पुष्पादिदत्वा ॥ धेनुमुद्रां प्रदर्श्यकूर्चेन जलं स्पृष्ट्वाऽमृतबीजं सप्रणवं द्वादश वारान् जपेत ॥ यथा ॥ ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्हीं ठं ऱ्ही ठं ऱ्ही ठं ॥ ततः सोममंडलाय षोडशकलात्मने नमः ॥ इति पुनर्गंधा-दिनार्चयेत् ॥ तत श्चक्रमुद्रया सम्यक् रक्षित्वा ॥ ततो मत्स्यमुद्रया आच्छादयेत् ॥ ततः शंखं संस्पृशन् ॥ कूर्चेन तज्जलं स्पृष्ट्वा ॥ मूलमंत्रमष्टशो जपेत ॥ ऱ्हीं नमोनारायणाय ॥ जलगायत्री यथा ॥ ऱ्हीं जलबिंबाय विद्महे मीनपुरुषाय धीमही ॥ तन्नो विष्णुः प्रचोदयात् ॥ ततः प्रोक्षणीपात्रे किंचित क्षिपेत ॥ शेषेण शंखजलेन सर्व-पूजोपकरणानि निजशरीरं च वारत्रयं मूलमंत्रेण प्रोक्षयेत् ॥ ततो गायत्रीमंत्रं पठीत्वा शंखमुद्रां प्रदर्शयेत ॥

यथा ॥ ह्रीं पांचजन्यायविद्महे पावमानाय धीमहि ॥ त तन्नः शंखः प्रचोदयात् ॥ इति गायत्री ॥ शंखस्थदेवतायै नमः ॥ इतिमंत्रेण शुद्धोदकैः संस्नाप्य पूजयेत ॥ शंखस्थदेवतायै नमः ॥ गंधं स० ॥ पुष्पं० धूपं० दीपं नैवेद्यं समर्पयामि ॥ पुष्पं गृहीत्वा प्रार्थयेत ॥ शंखादौ चंद्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठन्ति विप्रेन्द्र तस्माच्छंखं प्रपूजेत् ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते ॥ शंखस्थदेवताभ्यो नमः ॥ प्रार्थनापूर्वकं नमस्कारं स० ॥ अनया पूजया शंखस्थदेवताः प्रीयंतां नमम ॥ **अथ घंटा पूजनं** ॥ घंटास्थित-गरुडाय नमः॥आवाहयामि॥यथावकाशेन यथाशक्त्या पूजयेत॥पूजान्ते हस्ते धृत्वा नादं कुर्यात ॥सामध्वनिशरीर-स्त्वं वाहनं परमेष्ठिनः॥ विषपापहरोनित्यमतः शांतिं प्रयच्छमे ॥ आगमार्थन्तुदेवानां गमनार्थंतु रक्षसाम् ॥ घण्टानादं प्रकुर्वीत तस्माद्धण्टां प्रपूजयेत॥ इति मंत्रेण प्रार्थयेत् ॥ अनेन पूजनेन घण्टास्थितगरुडः प्रीयतां ॥ इति शंखघण्टा-पूजनं ॥ **अथ न्यासः** ॥ यजमानः स्वशरीरे न्यासान् कुर्यात् ॥ केशवायनमः वामकरे ॥ नारायणायनमः दक्षिणकरे ॥ माधवायनमः वामपादे ॥ गोविंदायनमः दक्षिणपादे ॥ विष्णवेनमः वामजानुनि ॥

मधुसूदनायनमः दक्षिण जानुनि ॥ त्रिविक्रमायनमः वामकट्यां ॥ वामनायनमः दक्षिण कट्यां ॥ श्रीधरायनमः नाभौ ॥ हृषीकेशायनमः हृदये ॥ पद्मनाभायनमः कंठे ॥ दामोदरायनमः वामबाहुमूले ॥ संकर्षणायनमः दक्षिणबाहुमूले ॥ वासुदेवायनमः मुखे ॥ प्रद्युम्नायनमः नेत्रयोः ॥ अनिरुद्धायनमः नासिकायां ॥ उरगायनमः ललाटे ॥ सर्वकामदायनमः शिखायां ॥ सहस्रशीर्षायनमः सर्वांगे ॥ अथ पंचाङ्गन्यासः ॥ दामोदरायनमः हृदि ॥ अधोक्षजायनमः शिरसि ॥ नृसिंहायनमः शिखायाम् ॥ अच्युतायनमः कवचे ॥ जनार्दनायनमः अस्त्रायफट् ॥ इति पंचांगन्यासः ॥ अथ महापातकहरन्यासः ॥ लक्ष्मीनारायणाभ्यांनमः पादयोः ॥ विशालाक्षिकेशवाभ्यांनमः जान्वोः ॥ सुनंदासंकर्षणाभ्यांनमः उर्वोः ॥ रुक्मिणीमाधवाभ्यांनमः कट्योः ॥ वैष्णव्यच्युताभ्यांनमः नाभौ ॥ नारायणीगोविंदाभ्यांनमः हृदि ॥ मित्रविंदाहृषीकेशाभ्यांनमः कंठे ॥ पद्माक्षित्रिविक्रमाभ्यांनमः हस्तयोः ॥ नारसिंहिनृसिंहाभ्यांनमः बाह्वोः ॥ सत्यावासुदेवाभ्यांनमः मुखे ॥ कालिंदीजनार्दनाभ्यांनमः नासिकयोः ॥ कमलावामनाभ्यांनमः अक्ष्णोः ॥ सत्याश्रीकृष्णाभ्यांनमः ललाटे ॥ जांबुवतीश्रीधराभ्यांनमः मूर्ध्नि ॥ लक्ष्मणाऽधोक्षजाभ्यांनमः शिखायां ॥ वाराहीपद्म-

नाभ्यां नमः सर्वांगे ॥ **अथ अंगांगन्यासः** ॥ जिष्णवेनमः शिरसि ॥ १ ॥ विष्णवेनमः वामनेत्रे ॥ २ ॥ हरयेनमः दक्षिणनेत्रे ॥ ३ ॥ कृष्णायनमः वामश्रोत्रे ॥ ४ ॥ अधोक्षजायनमः दक्षिणश्रोत्रे ॥ ५ ॥ महाविष्णवेनमः वामबाहुमूले ॥ ६ ॥ केशवायनमः वामकूर्परे ॥ ७ ॥ माधवायनमः वाममणिबंधे ॥ ८ ॥ रामायनमः वामांगुलिमूले ॥ ९ ॥ अच्युतायनमः वामांगुल्यग्रे ॥ १० ॥ पुरुषोत्तमायनमः दक्षिणबाहुमूले ॥ ११ ॥ गोविंदायनमः दक्षिणबाहुकूर्परे ॥ १२ ॥ वामनायनमः दक्षिणबाहुमणिबंधे ॥ १३ ॥ श्रीशायनमः दक्षिणबाह्वंगुलीमूले ॥ १४ ॥ श्रीकण्ठायनमः दक्षिणबाह्वंगुल्याग्रे ॥ १५ ॥ विश्वसाक्षिणेनमः हृदि ॥ १६ ॥ नारायणाय नमः वामपादमूले ॥ १७ ॥ मधुरिपवे नमः वामजानुनि ॥ १८ ॥ अनिरुद्धायनमः वामपादांगुलिमूले ॥ १९ ॥ त्रिविक्रमायनमः वामपादांगुल्यग्रे ॥ २० ॥ वासुदेवायनमः दक्षिणपादमूले ॥ २१ ॥ जगद्योनयेनमः दक्षिणजानुनि ॥ २२ ॥ शेषतल्पगतायनमः दक्षिणपादांगुलिमूले ॥ २३ ॥ संकर्षणायनमः दक्षिणपादांगुल्यग्रे ॥ २४ ॥ **अथैकादशन्यासः** ॥ प्रद्युम्नायनमः शिखायां ॥ १ ॥ दैत्यारये नमः मुखवृत्ते ॥ २ ॥ विश्वतोमुखायनमः कण्ठदि ॥ ३ ॥ जनार्दनायनमः चिबुके ॥ ४ ॥ धराधरायनमः हृदयादिवामांसे ॥ ५ ॥ श्रीधरायनमः हृदया-

दिदक्षिणांशे ॥ ६ ॥ पूतनाप्राणहर्त्रेनमः नाभौ ॥ ७॥ यशोदास्तनन्धयायनमः गुह्ये ॥ ८ ॥ मारिचघातिने नमः गुदे ॥ ८ ॥ हस्तप्रक्षालनम् ॥ ९ ॥ बकारयेनमः कट्यादिवामपादांतम् ॥ वृत्रारिप्रियायनमः कट्यादिदक्षिणपादांतं ॥११ ॥ इतिएकादशन्यासः ॥ **अथ करन्यासः** ॥ अंगुष्ठयोः वासुदेवायनमः ॥ तर्जन्योः अनिरुद्धायनमः मध्यमयोः ॥ संकर्षणायनमः ॥ अनामिकयोः ॥ प्रद्युम्नायनमः कनिष्ठिकयोः हृषीकेशायनमः ॥ करतलकरपृष्ठयोः पुरुषोत्तमायनमः॥ इतिदेहन्यासः॥ **अथ देवन्यासः**॥ देवान्स्पृष्ट्वा हस्तेतुलसिदलंगृहित्वा केशवायनमः देवस्यवामकरे ॥ नारायनमः देवस्यदक्षिणकरे ॥ माधवायनमः देवस्यवामपादे ॥ गोविंदायनमः देवस्यदक्षिणपादे ॥ विष्णवेनमः देवस्यवामजानुनि ॥ मधुसूदनायनमः देवस्यदक्षिणजानुनि ॥ त्रिविक्रमायनमः देवस्यवामकट्यां ॥ वामनायनमः देवस्य दक्षिणकट्यां ॥ श्रीधरायनमः देवस्यनाभौ ॥ हृषीकेशायनमः देवस्यहृदये ॥ पद्मनाभायनमः देवस्यकंठे ॥ दामोदरायनमः देवस्यवामबाहुमूले ॥ संकर्षणायनमः देवस्यदक्षिणबाहु-

अर्थ—एवीरीते तिलक तुळसी माळा शस्त्र घंटा विगेरेनु पूजन स्थापन थयापछि पोताना शरीरनी शुद्धि थवाने उपर लखेला न्यासो करवा. एटले मंत्राने मनमाने पोताना शरीरे कहेले ठेकाणे हाथ अरकाडवो, तथा पोताना शरीरना न्यासो थया पछी, हाथमा तुळसी अथवा पुष्प लइ भगवानने अरकाडी तेमने शरीरे, ते ते स्थानना देवताओनु प्राकट्य थवा तेमनान्यासो करवा.

